## वाचक अक्षयचन्द्रगणि कृतं

## मातृकाप्रकरमम् ॥

ॐ नमः पार्श्वाय ॥

बुद्ध्यर्थोऽयमभियोगः । प्रभुपादप्रसादावाप्तेः ॥१॥

स जयति भगवान् पार्श्वः, उपान्तिमजिनः । सर्वोत्कर्षेण वर्तते प्रवचनेऽपि पुरुषैरादानीयत्वात् तस्य ॥२॥

अपि चेदं किल सरस्वत्याः स्वरूपं, वक्ष्यमाणं तत्तं(त्त्वं) वाग्देवताया वेदितव्यम् ॥३॥

श्रेयोर्थसार्थ – – हः समुच्चै – विश्वेऽपि वर्णा निरगुर्यतोऽमी ।
स्वाभाविकोष्णीषविराजमानं ज्ञानाय जैनं वदनस्वरूपम् ॥

तत् ं इति ॥४॥

पदावलीकोशमुशन्ति यद् वै, तत् पुस्तकं स्ताद् गुणवृद्धिसिद्ध्यै ॥

। □ इति ॥५॥

शास्त्रावतारेऽध्ययनादिसीमा रेखाद्वयं तद् दिशताद् विवेकम् ॥

यथा ॥ इति ॥६॥

दोषा न सन्ति त्वयि, देव ! तुभ्यं, **विश्वोँ नमः सिद्ध**मुपास्महे त्वाम् ।
स्वामिन् ! स्वरत्वाभ्युदितोऽसि स त्वं, त्वं व्यंजनात्माऽसि पराश्रितोऽसि ॥

अत एवेत्थंकारं –

पदमात्रमपि स्वामिन् ! नास्त्यत्र भुवनत्रये ।
अर्थयुक्तिविचारेण, यद् भवन्तं न धावते ॥ इति ॥७॥

पश्यत भोः ! पुण्यचित्ताः सभासदः !, पश्यन्तु भो भवन्तो विद्वद्वृन्दारविन्दमकरन्दरूपाः !, इह हि –

**स्याच्छब्द**शोधितं शुभ–त्यकारादिश्रुताक्षरम् ।
अनन्ताणुमयस्कन्ध–समुत्थं योग्यतापथे ॥८॥

अपि च साध्विदमुच्यते –

**अ आ इ ई** मता देवि ! सरस्वति

**उ ऊ ऋ ॠ ऌ ॡ ए ए (ऐ)** च **ओ औ** च ।

**कः ख-गौ घ-**ङमित्यपि ।

**च-छौ ज-झ-**ञमीहित्वा , **ट-ठौ** ड-**ढ-ण**मीहसे ॥

**त-थौ** द-**ध-न**मूहित्वा **प-फौ ब-भ-म**मूहसे ।

मातर्य-र-ल-वाः ख्याता-स्त्वया **श-ष-स-हाः** क्रमात् ॥

अं अः [१] कंठ्याः प्लुतश्चेति, त्वदीहा विश्ववेशिनी ॥९॥

किं च –

लिपिमन्तः परे चेति वर्णा निगदिता द्विधा ।

**अ आ इ ई उ ऊ** इत्यादि १।

बहुवचनं प्लुतबहुत्वार्थम् २। १०॥

स्वपराश्रयतः प्रोक्ता द्वेधा लिपिमतां गतिः ॥

**अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ । क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म, य र ल व श ष स ह १। अं अः** )( कंठ्य २। ११॥

**स्वर-व्यञ्जन**तो द्वैधं स्वाश्रिताः पर्युपासते ॥

**अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ** १।

**कखगघङ, चछजझञ, टठडढण, तथदधन, पफबभम, यरलव, शषस, ह,** २। १२॥

**समान-सन्ध्यक्षरतः** स्वरभेदद्वयी भवेत् ॥१३॥

तत्र –

**अ-आ, इ-ई,** उ-ऊ चैव, **ऋ- ॠ , ऌ-ॡ** इति स्फुटम् ।

द्वाभ्यां द्वाभ्यां **समानानां**, प्रणीताः पञ्च जातयः ॥१४॥

**ए-ऐ, ओ-औ**, चतस्रोऽमूः, स्युः **सन्ध्यक्षर**जातयः ॥१५॥

मात्रात्वेन भवन्तोऽमी, व्यञ्जनानां वरीयसाम् ।

विराजन्ते यथायोग-मलङ्कारा नृणामिव ॥

---

१. $\overset{x}{\text{कं}}$

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**क का कि की कु कू कृ कॄ क्लृ क्लॄ के कै को कौ कं कः** इत्यपि स्वाश्रितत्वात् ॥१६॥

औपर्यन्ता इकाराद्या **नामित्वे** विदिताः स्वराः ॥

**इ ई उ ऊ ऋ ॠ लृ लॄ ए ऐ ओ औ** ॥१७॥

स्थान-स्वरूप नमना-न्नामिनो भयथा (?) मता(:) ॥१८॥

इदादेः प्रथमैव स्यात्,

**कि [ कि की ] की, कु कु कू कू कृ कृ कॄ कॄ क्लृ क्लृ क्लॄ क्लॄ** ॥१९॥

एकारप्रभृतेः परा ॥

**के के कै कै को[को] कौ कौ** ॥२०॥

**वर्ग्यावर्ग्य**विमर्शेन द्वेधा व्यञ्जनसंमतिः ॥

**कखगघङ, चछजझञ, टठडढण, तथदधन, पफबभम** १।

**यरलव, शषस, ह** २ ॥२१॥

पञ्चभिः पञ्चभिः पञ्च **वर्गाः** कु-चु-टव स्तु-पू ॥२२॥

**कौ** क-खौ ग-घ-ङ श्चोक्ताः, २३॥, **चौ** च-छौ ज-झ-ञास्तथा ॥२४॥

**टौ** ट-ठौ ड-ढ-णाश्चाप्ताः, २५॥, **तौ** त-थौ द-धनाः पुनः ॥२६॥

**पौ** प-फौ ब-भ-माश्चैव प्राज्ञपुङ्गवशिष्टितः ॥२७॥

अवर्ग्या द्विप्रभेदाः स्यु-**रन्तस्थोष्म**विचारतः ॥२८॥

चतुर्द्धा ते **य-र-ल-वैः प्राञ्चः** २९, **श-ष-स-हैः** परे ॥३०॥

व्यञ्जनस्याऽन्तलभ्यत्वात् स्वाश्रितत्वं विशिष्यते।

अनारुह्य समीपोऽपि मा(अ?) श्चवार इतीर्यताम् ॥

स्वरगौरवहेतुत्वा-न्नेदं दीनदरिद्रवत्।

विभाव-पर्यय-स्फूर्तिं छायावदभितः श्रयत् ॥

अत एवेत्थंकारं -

लघुर्यदि पुरः कृत्वा, व्यञ्जन(नो ?) गुरुतां गतः।

फलवान् वीतरागेऽपि विनयः प्रा[ग् ?] भवैषिणाम् ॥३१॥

अं अः क्रमानुस्वार-विसर्गौ )( कंठ्य एव तु।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिह्वामूल उपध्मेति चत्वारोऽपि पराश्रिता: ॥३२॥
शिरोबिन्दु–पुरोबिन्दू वज्रवद् गजकुम्भवत् ।
वर्णाकारविदः प्राहु–रमीषामाकृतिक्रमम् ॥
अनुस्वारादिकादीनां योऽधिकः कोऽपि कल्प्यते ।
उच्चारश्च सुखोच्चार–स्तदधीनस्ततः स **इत्** [३३ ?]
ज्यायस्त्वा**द्**–**क**–**पा** एव प्रयुक्तास्तत्र तात्त्विकैः ।
लोकानुग्रहलोपः स्याद् बहुत्वे भेददर्शनात् ॥
व्यवहाराः प्रवर्तन्ते शलभीयगतिर्यथा ।
पंचमत्वादिनोदादि–रिति वर्गादिदेशकः ॥३४॥
अनुस्वारो विसर्गश्च, पृष्ठतः स्वरमिच्छतः ।
जिह्वामूलमुपध्मा च स्वरं व्यञ्जनमन्तरा ॥
**क**–**ख**ावेव श्रये जिह्वा–मूलीयः पुरतो गमौ ।
उपध्मानीयनामा तु **प**–**फा** वेवेयमौचिती ॥३५॥
अनुस्वारस्य तद्वन्त–मुपध्मानीयमूष्मसु ।
रेफे च सति मन्यन्ते च्छान्दसाः स्वैरिबुद्धयः ॥
यतस्ते –
अलाबुवीणनिर्घोषो दन्तमूल्यस्वरानुगः ।
अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च ॥

**गणपतिं ७ं हवामहे । ब्राह्मणानां ७ं राजा । अ ७ं शुनाति । सुची ७ं षत् । त्व ७ं सोमः** ॥३६॥

ननु –
त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः संभवतो मताः ।
प्राकृते संस्कृते वापि स्वयं प्रोक्ताः **स्वयम्भुवा** ॥
स्वरा विंशतिरेकश्च,

**अ आ आ इ ई ई उ ऊ ऊ ऋ ॠ ॠ लृ लृ लृ ए ऐ ऐ ओ औ औ** ॥

स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृता ह्यष्टौ चत्वारस्तु यमाः स्मृताः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुं खुं गुं घुं ॥

अनुस्वारो विसर्गश्च )( क ≍पं चापि पराश्रयौ ।

दुःस्पृष्टश्चेति विज्ञेय लृकारः प्लुत एव च ॥

तदेतदल्पीयः । कथं चतुःषष्टिरिति भवतामपि ॥

व्यञ्जनानि त्रयस्त्रिंशत् स्वराणां सप्तविंशतिः ।

नवानां त्रित्वात् ॥

चत्वारोऽयोगवाहाश्च वर्णसंख्या प्रकीर्तिता ॥३७॥

अत इदम् –

वादे गुम्फे च लिखने वर्तते यस्य नौचिती ।

गृहकोणगतप्रायं प्रतीतं **वैदिकं मतम्** ॥३८॥

अथ नं ≍ पाही त्याद्यपि ॥

नृनित्यतः पे सति यः सकारः, सूते विसर्गं स च सौत्युपध्मां ।

द्वय्यप्यसौ काप्यपवादभूता–नुस्वारमेव स्वरवद् विवेद ॥

यस्माद् बहवः –

चतुर्णामपि सूत्राणा–मितिशब्दः पुनः पुनः ।

स्वरत्वं व्यञ्जनत्वं च स्वसंज्ञत्वमपीष्यते ॥३९॥

क्रियामात्रत्वमाहत्य स्वरणं व्यक्तिराश्रयः ।

त्रितयं नैकवर्त्येव न यो(मो)दाय विपश्चिताम् ॥४०॥

सर्वोदाहरणस्य –

व्यूढा ज्ञानोष्म–झंझा भुवनतरुफलं कर्म–कक्षाऽग्निरर्हन्

बुद्ध्युत्था वाङ्मयाब्धिर्विटपितकरुण )( खण्डिताशेषशाठ्यः ।

स्वच्छः श्लाघैकमूर्ति ≍ प्रकृतिपरतैश्वर्यपीनः स्फुटौजा

नृदो नृणां स्थितार्चः स भवति **भगवान्** क्लृप्तसर्वार्थसिद्धिः ॥४१॥

असवर्णतयोच्यन्त–ऊष्म–रेफ–पराश्रिताः ॥

**र श ष स अं अः )( क≍प** ॥४२॥

तुल्यस्थानास्य–यत्नाभ्यां सवर्णः शेषसंग्रहः ॥४३॥

अनन्यत्रोदितैदादेः सवर्णत्वप्रयोजनम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोकः क्वापि गतो मित्रं स्वपदे प्रेरयत्यपि ॥
सन्धिभागविपर्यासान्न लिपिस्तस्य साधनम् ।
इवर्णादाववर्णाद्वा विधिर्मोघस्तु भेदतः ॥
एकारस्य न कंठ्यत्वं नापि तालव्यतैषयत् ।
कंठ-तालव्यतायुक्ते-र्विजातिर्नरसिंहवत् ॥
अ-कादेर्न कथं स्वत्वं स्थानतो यदि केवलात् ।
वक्त्रप्रयत्नादिति चे-ददिदादेः कथं न तत् ? ॥
संमत्यैव शकारादेः प्रकारोऽयं निवारितः ।
यतस्तावदुदासीनो न स्वदेहेऽपि मूर्च्छति ॥४४॥

अथवा साध्विदमुच्यते —

अदेकार-क-यादीनां सावर्ण्य-निगद-क्रमः ।
जात्योच्चरितसर्गेण वर्गेण स्वयमेव च ॥

**अ आ । आ आ । अ अ । आ अ** ॥

यस्मादाहुः —

क्रमोत्क्रमस्वरूपेण लघूनां लघुभिः सह ।
गुरूणां गुरुभिः सार्धं लघूनां गुरुभिः सह ॥
गुरूणां लघुभिः सार्द्धं चतुर्धेति सवर्णता ।

एवं – **इ ई । उ ऊ । ऋ ॠ । ऌ ॡ ।** इति जातेः ।१। **ए ऐ । ओ औ ।** उच्चरितेन ।२।

**क क । क ख । क ग । क घ । क ङ। ख क । ख ख । ख ग । ख घ । ख ङ। ग क । ग ख । ग ग । ग घ । ग ङ। घ क । घ ख । घ ग। घ घ । घ ङ। ङ क । ङ ख । ङ ग । ङ घ । ङ ङ ।१। च च । च छ। च ज । च झ । च ञ । इत्येवं मकारान्ताः । वर्गेण ३। य य । ल ल । व व । स्वयम्** ४ ॥४५॥

ह्रवर्जितव्यञ्जनमाश्रयन्ती द्विताऽस्ति तत्त्वादुपचारतश्च ।
हस्य द्वयी तूच्चरितुं न शक्या र-योर्दुरुच्चारणमेव दोषः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**क्क क्ख ग्ग ग्घ ङ्ङ । च्च च्छ ज्ज ज्झ ञ्ञ । ट्ट ट्ठ ड्ड ड्ढ ण्ण । त्त त्थ द्द द्ध न्न । प्प प्फ ब्ब ब्भ म्म । य्य । र । ल्ल । व्व । श्श । ष्ष । स्स । ह । ४६॥**

परमार्थद्विता सैव या विकुर्वितमूर्तिवत् ।
अर्क्क-मूर्क्खा-र्ग्गला-र्घ्घाश्च, क्रुङ्ङु दोर्च्चनमूर्च्छनम् ।
ऊर्ज्जो झर्ज्झति गीर्ञ्ञत्वं पट्टचो मड्डयनड्डयया: ॥
धुड्ढंढी पर्ण्ण वार्त्तार्त्थ-मर्द्द-गर्द्धा-महन्नयम् ।
अर्प्पणं गीर्प्फलं चैव शर्ब्बरी गर्ब्भितोर्म्मय: ॥
मर्य्यादा दुर्ल्लयौ सर्व्व: पार्श्शर्वं वर्ष्ष्म चमस्स्यसौ ॥४७॥
अपरा तूपचारेण सदृशाकारबन्धुवत् ।
दक्कला वाक्खर: प्राग्गी-र्वाग्घरि: प्राङ्ङ कारता ।
तच्चरं तच्छलं तज्जं तज्झर-स्तञ्ञताऽट्टनम् ।
विट्ठलश्चुड्डतड्ढारौ षण्णां तत्तोत्थ-तद्दया ॥
तद्धी-तन्नीक कुप्पोषा-प्फला-ब्बल-ककुब्भरा: ।
अम्मयाय्यय-तल्लक्ष्मी-संव्वत्सरवयश्शया ॥
कष्षाडव-यशस्साधु-इत्येवं द्वित्वदर्शनम् ॥४८॥
प्रथमै: स्याद् द्वितीयानां द्वितासिद्धि: प्रसिद्धित: ॥

**क्ख, च्छ, ट्ठ, त्थ, प्फ** ।४९॥

तृतीयैस्तु चतुर्थानां ,

**ग्घ, ज्झ, ड्ढ, द्ध, ब्भ** ॥५०॥

तैस्तैरपि च कुत्रचित् ।

**ख्ख, छ्छ, ठ्ठ, थ्थ, फ्फ, घ्घ, झ्झ, ढ्ढ, ध्ध, भ्भ**। अल्पतरप्रयोगत्वात् ।५१॥

अकृत्वा गर्विताकारं परेभ्यो वृद्धिदायिनाम् ।
महतामङ्ग संसारे रीतिरस्ति रकारवत् ॥
णादीनां द्वित्वहेतुत्वाद् हकारोऽप्येवमस्ति चेत् ।
अल्पत्वादप्रसिद्धत्वात् तत्प्रयोगस्य नाऽऽदर: ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परक्षापटू रेफो प्रशिष्टां प्रत्ययार्हताम् ।

प्राप्तो यदि तदा सत्यं सन्तः सत्त्वदयालवः ॥५२॥

अघोष-ण-न-मा-ऽन्तस्थाः ककारस्य पुरस्सराः ।

**क्क क्ख । क्च क्छ । क्ट क्ठ । क्ण । क्त । क्थ । क्न । क्प क्फ क्म । क्य क्र । क्ल क्व । क्श क्ष क्स ॥**

सिक्करो दिक्खरो वाक्च दिक्छी वाक्टी किं क्रकृताः (?) ।

वृक्णा क्त सक्थि शक्नोति दिक्पालाक्फल रुक्मिणः ॥

वाक्ये क्रिया क्लमं पक्व वाक्शूरो यक्ष दिक्सरः ॥५३॥

ख-घ-धां न-म-यु र्वः स्युः,

**ख्न ख्म ख्य ख्र ख्व । चख्नुः । नानख्मि । संख्या । विख्रः । आख्वयं ॥५४॥**

ग-ड-बां ब-त-नादिनः ।

**ग्ग ग्घ ग्ङ ग्ज ग्झ ग्ञ ग्ड ग्ढ ग्ण ग्द ग्ध ग्न ग्ब ग्भ ग्म ग्य ग्र ग्ल ग्व ग्ह ॥**

दिग्गे वाग्घृत वाग्ङत्व-दृग्ज-वाग्झर-सिग्ञताः ।

वाग्डम्बर-मुदग्ढक्का-रुग्ण-ऋग्दण्ड-दिग्धनम् ॥

मग्न-दिग्बल-ऋग्भीति-र्वाग्मि-भाग्याग्र-दिग्लताः ।

स्रग्विणी-वाग्हस्थ्चैवं गाग्रणीनां विभा[व]ना ॥

**ड्ग ड्घ ड्ङ । ड्ज ड्झ ड्ञ । ड्ड ड्ढ ड्ण । ड्द ड्ध ड्न । ड्ब ड्भ ड्म । ड्य ड्र ड्ल ड्व ड्ह ॥**

खड्ग षडित्यतो घस्र-ङाशा-जनन-झंक्रिया: ।

ञार्थन-डाकिनी-ढौकी-णाकृतिर्दम-धी-नयाः ॥

बालिका-भू-मनो-योधा रमा-लक्ष्मी-वशा-हयाः ॥

**ब्ग ब्घ ब्ङ । ब्ज ब्झ ब्ञ । ब्ड ब्ढ ब्ण । ब्द ब्ध ब्न । ब्ब ब्भ ब्म । ब्य ब्र ब्ल ब्व ब्ह ॥**

अबगः । अबित्यतो घस्रादयः ॥५५॥

च-छ-ञ-म्यवशाश्चस्य,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**च्च च्छ च्ञ च्म च्य च्व च्श** ॥

उच्चा–च्छ–याच्ञा–वावच्मो वाच्यं वच्वोल्लसञ्च्शयः ॥५६॥

छ–ढोर्मयर्वः ॥

**छ्म छ्य छ्र छ्व । पोपुच्छ्मि । वांछ्यम् । उच्छ्रीः । पोपुच्छ्व ः ।**

**ढ्म ढ्य ढ्र ढ्व । जाघाढ्मि । आढ्यम् । मेंढ्रम् । कृषीढ्वम्** ॥

अथ जस्य ज–झ–ञ–ह–पि ॥

**ज्ज ज्झ ज्ञ ज्म ज्य ज्र ज्व ज्ह । मज्जा । सज्झम्पा । ज्ञानं । वावज्मि । आज्यम् । वज्रम् । उज्ज्वलम् । अज्हलौ** ॥५८॥

झ–फ योर्मयवम् ॥

**झ्म झ्य झ्व । जाझर्झ्मि । जाझझ्र्यात् । जाझझ्र्वः** ॥

**फ्म फ्य फ्व । ररफ्मि । ररफ्यात् । ररफ्वः** ॥५९॥

टस्याऽघोष–र–ल–पि ॥

**ट्क ट्ख ट्च ट्छ ट्ट ट्ठ ट्त ट्थ ट्प ट्फ ट्म ट्य ट्र ट्व ट्श ट्ष ट्स** ॥

**षट्कम् । षट्खनित्रम् । विट्चरः । त्विट्छाया । पट्टम् । विट्ठलः । षट्तयम् । धृट्थुर्वेति । लिट्पतिः । तत्त्वप्राट्फलम् । पापट्मि । लुट्चम् । राष्ट्रियः । वेट्लाट्यति । पट्वी । षट्शम् । वषट्षण्णाम् । षट्सु** ॥६०॥

ठस्य ण–म–य–विति ॥

**ठ्ण ठ्म ठ्य ठ्व** ॥ **हिठ्णाति । पापठ्मि । पाठ्यम् । पापठ्वः** ॥६१॥

तस्य क–ख–त–थ–न–प–फ–म–य–र–व–ष–सम् ॥

**त्क त्ख त्त त्थ त्न त्प त्फ त्म त्य त्र त्व त्ष त्स** ॥

**तत्कम् । सत्खु । वित्तम् । तुत्थम् । रत्नम् । चित्पतिः । मुत्फलम् । आत्मा । सत्यम् । त्रयम् । सांत्वनम् । तत्षण्णाम् । वत्सरः** ॥

[थस्य म–य–वम् ॥

**थ्म थ्य थ्व ॥ पा]पथ्मि । पथ्यम् । पापथ्वः** ॥६२॥

दस्य ग्वच्चुदु मुक्त्वा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**द्न द्ध द्ङ द्द द्ध द्न द्व द्ध द्म द्य द्र द्ल द्व द्ह** ॥

मुदित्यतोऽज-झ-ञ-ड-ढ-णो-नाः ॥६३॥

चु-टु-ल-शवर्जास्तु नस्य ॥

**न्क न्ख न्ग न्घ न्ङ । न्त न्थ न्द न्ध न्न । न्प न्फ न्ब न्भ न्म । न्य न्र न्व न्ष न्स न्ह** ॥

सन्नत्यतो(तः) कर-खर-गर-धर्म-ङता-त्सरु-पन्थः-दर-धर-नर-पर-फल-बल-भर-माल-यत्न-रत्न-वर-षट्क-सुर-हराः ॥६४॥

पस्य पुनः श्वासि-ण-न-म-मन्तःस्थाः ॥

**प्क प्ख प्च प्छ प्ट प्ठ प्ण प्त प्थ प्न प्प प्फ प्म प्य प्र प्ल प्व प्श प्ष प्स** ॥

ककुप् शब्दात् क्रिया-खनि-चेष्टा-छल-टीका-ठत्वं । **तृप्णोति । सुप्तः । ककुप्थूत्कारः । स्वप्न । अप्पित्तम् । अप्फलम् । पाप्मा । रूप्यम् । क्षिप्रम् । प्लीहः । त्रप्विदम्** ॥६५॥

म-न-मन्तस्था भकारस्य ॥

**भ्म भ्य भ्र भ्ल भ्व । हृभ्नाति । लालम्भि । लभ्यम् । शुभ्रम् । भ्लक्षति । भ्वादयः** ॥६६॥

मस्य पु-ण-न-हा-न्तस्थाः ॥

**म्ण म्न म्प म्फ म्ब म्भ म्म म्य म्र म्ल म्व ॥ अर्यम्णः । आम्नातं । किम्पचति । किम्फलति । किम्बलम् । तम्भरति । अम्मयः । रम्यम् । कम्रम् । म्लानिः । किम्वक्तम् । किम्ह्वलति** ॥६७॥

रेफ-सकारो निता रकारस्य ॥

**र्क र्ख र्ग र्घ र्ङ । र्च र्छ र्ज र्झ र्ञ । र्ट र्ठ र्ड र्ढ र्ण । र्त र्थ र्द र्ध र्न । र्प र्फ र्ब र्भ र्म । र्य र्ल र्व र्श र्ष र्ह** ॥

**अर्कादयः । गीर्ङता । अर्चादयः । अमार्ट् । गीर्ठता । अमार्ड् । धूर्ढुढ्यादयः । निर्नयः । अर्पणादयः । अर्हन्** ॥६८॥

शाश्च छ-न-म-शा-न्तस्थाः ॥

**श्च श्छ श्न श्म श्य श्र श्ल श्व श्श** ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्च्युतिः । कश्छादयति । अश्मः । वश्यम् । श्रीः । श्लीलः । श्वा । कश्शूरः ॥६९॥

क-ट-ठ-ण-प-फ-म-य-व-षाः षस्य ॥

ष्क ष्ट ष्ठ ष्ण ष्प ष्फ ष्म ष्य ष्व ष्ष ॥

शुष्कम् । षष्टः । षष्ठः । विष्णुः । सर्पिष्पाशम् । निष्फलम् । शुष्म । वृष्यम् । लालष्वः । कष्षण्डे ॥७०॥

षोनं सस्य त व त् ॥

स्क स्ख स्त स्थ स्न । स्प स्फ स्म स्य स्र स्व स्स ॥

स्कन्दः । स्खलन । अस्ति । स्थानम् । स्नानम् । बृहस्पतिः । आस्फालः । अस्मि । रस्यम् । विस्रहा । स्वं । कस्साधुः ॥७१॥

ण-न-मा-न्तस्था हस्य ॥

ह्ण ह्न ह्म ह्य ह्र ह्ल ह्व ॥

पूर्वाह्णेतरे । मध्याह्नः । जिह्मम् । सह्यः । ह्रीः । आह्लादः । ह्वयति ॥७२॥

केन शेषाणां वि-तु-ञां ङ-ञ-ण-य-व-लामिति ॥

ङ्क ङ्ख ङ्ग ङ्घ ङ्ङ । ङ्च ङ्छ ङ्ज ङ्झ ङ्ञ । ङ्ट ङ्ठ ङ्ड ङ्ढ ङ्ण । ङ्त ङ्थ ङ्द ङ्ध ङ्न । ङ्प ङ्फ ङ्ब ङ्भ ङ्म । ङ्य ङ्र ङ्ल ङ्व । ङ्श ङ्ष ङ्स ङ्ह ॥

प्रत्यङ्ङित्यतः क-ख-गी-र्घृत-ङत्व-चीर-च्छद-जू-झेर-ताटंक-द्वार्थ-डम्ब-ढुंढि-ण-तात-रुथत्व-देव-धर्म-नी-पू०फाल्गुनी-बोल-भीम-मद-यत-रत-लता-वार्ता-शर-षष्ट-सह-हराः १।

ञ्क ञ्ख ञ्ग ञ्घ ञ्ङ । ञ्च ञ्छ ञ्ज ञ्झ ञ्ञ । ञ्ट ञ्ठ ञ्ड ञ्ढ ञ्ण । ञ्प ञ्फ ञ्ब ञ्भ ञ्म । ञ्य ञ्र ञ्ल ञ्व । ञ्श ञ्ष ञ्स ञ्ह ॥

लिखितञित्यतः कादयस्त-थ-द-ध-न रहिताः ॥२॥

ण्क ण्ख ण्ग ण्घ ण्ङ । ण्च ण्छ ण्ज ण्झ ण्ञ । ण्ट ण्ठ ण्ड ण्ढ ण्ण । ण्त ण्थ ण्द ण्ध ण्न । ण्प ण्फ ण्ब ण्भ ण्म । ण्य ण्र ण्ल ण्व । ण्श ण्ष ण्स ण्ह ॥

सुगण्णित्यतः कादयः ॥ ३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**य्क य्ख य्ग य्घ य्ङ। य्च य्छ य्ज य्झ य्ञ। य्ट य्ठ य्ड य्ढ य्ण। य्त य्थ य्द य्ध य्न। य्प य्फ य्ब य्भ य्म। य्य य्र य्ल य्व। य्श य्ष य्स य्ह ॥**

सदयित्यतः कादयः ॥४॥

**ल्क ल्ख ल्ग ल्घ ल्ङ। ल्च ल्छ ल्ज ल्झ ल्ञ। ल्ट ल्ठ ल्ड ल्ढ ल्ण। ल्त ल्थ ल्द ल्ध ल्न। ल्प ल्फ ल्बं ल्भ ल्म। ल्य ल्र ल्ल ल्व। ल्श ल्ष ल्स ल्ह ॥**

कमलित्यतः कादयः ॥५॥

**व्क व्ख व्ग व्घ व्ङ। व्च व्छ व्ज व्झ व्ञ। व्ट व्ठ व्ड व्ढ व्ण। व्त व्थ व्द व्ध व्न। व्प व्फ व्ब व्भ व्म। व्य व्र व्ल व्व। व्श व्ष व्स व्ह ॥**

सुदेवित्यतः कादयः ॥६॥ ७३॥

ख-फ-छ-ठ-थस्य तु श-ष-सपि ॥

विपरीतग्रहणं क्वाचित्कताज्ञापनार्थम् ॥

**ख्श ख्ष ख्स। फ्श फ्ष फ्स। छ्श छ्ष छ्स। ठ्श ठ्ष ठ्स। थ्श थ्ष थ्स ॥**

**अख्शरः। प्राङ्ख्षष्ठः। अख्सरः। अछ्सरः। सुगण्ठ्साधुः। वथ्सरः।** इत्यादि ॥७४॥

शिक्षा तु सर्वगता ॥

**क्ग क्घ क्ङ** इत्यादि ॥

नहि शिक्षायाः किमप्यगोचरम् ॥ सर्वमप्येतल्लक्ष्यमिति निर्देशात् ॥७५॥

नखा[१] - ङ्के[२] - नखे[३] - ऋतवः[४] सर्वे[५] - र्षि[६] - फणि[७] - सिद्धयः[८]।

वेदे[९] - सद्मे[१०] - पुराणे[११] - श्वे[१२] - नख[१३] - भूता[१४] - खिला[१५] स्तथा ॥

अघोष[१६] - हय[१७] - पूर्व[१८] - र्त्तु[१९] - शवला[२०] - विंशति[२१] - र्नयाः[२२]।

नख[२३] - राग[२४] - हराः[२५] - सर्व[२६] - सत्रिंश[२७] - दखिला[२८] - खिलाः[२९] ॥

नन्द[३०] - दिग्[३१] - मास[३२] - मुनयः[३३] संभवन्तः क्रमादमी।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कादितः संगृहीताः स्यु - रग्रण्यः पदपण्डितैः ॥७६॥
सिद्धाः पंचकपर्यन्तं संयोगाः पदगोचरे ॥
**श्रीः । श्र्यादिः । लक्ष्म्यः । कात्स्न्र्यम्** ॥७७॥
सप्ताक्षरोऽप्यवयवः 'कात्स्न्र्य' मित्यादिलम्भनात् ॥
**अ । क । स्म । क्ष्मा । दाक्ष्यम् । लक्ष्म्याम् । कात्स्न्र्यम्** । अन्यत्र **ह्म्ल्व्र्यौं** ॥७८॥
नानालिखनराभस्याः केऽपि स्वेन परेण वा ॥७९॥
यथा अ-ज-ड-भ-शम् । ऽ अ । ज ज्ज । ड ड । भ भ । श श ॥८०॥
थश्च व्युत्क्रमो विशेषार्थः ॥
थ थ । [illegible] ॥८१॥
ज-षाद्यास्तु ज-कादितः ॥
[illegible] ( क्ष ) [illegible] । [illegible] ज्ञ ॥८२॥
ककार एवोकारादि समान-थ-न-रे ल-षोः ॥
**कु कू कृ कॄ क्लृ क्लॄ [illegible] क्न क्र क्ल क्ष** ॥८३॥
परवत् केऽप्यदूरेण माऽतोऽस्त्वनवधानता ॥८४॥
वपुरीह डकारादे-र्मकारादितया त्वरा ॥
**ड म, स भ, न त, ठ छ, ब व, क फ, प ष, न ल । ठ ट लृ । ट ड ङ । ट ढ द ह । ख व च । य थ घ थ ध । झ ज न । उ ओ औ । ए ए ( ऐ )।** इत्यादि ॥८५॥
गुरवो द्विप्रकाराः स्यु-रुपाधेः स्वत एव च ॥८६॥
उपाधिर्द्विविधः सीम-योगाभ्यां परिभाषितः ॥८७॥
प्राहुः पदस्य वाक्यस्य पादस्य शकलस्य च ।
अन्यत्र तगणादिभ्यः सीमामपि चतुर्विधाम् ॥८८॥
वाक्ये पदानां पदेषु वा वाक्यस्यान्तर्भाव एवेत्यल्पीयः ।
परकीयकर्णपीडाकारी श्रवणातिरोगरुग्णः स्यात् ।
इति नैगमोपदेशं भिन्नतया स्पृहयति स्कन्धात् ॥
देव १ । मुनिर्मानितो भवति २ ॥८९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दलयोर्न मिथः सन्धिः पादौ स्यातां पृथग् यती ।
इत्यर्धचरणस्थित्या रेखे रेखा च वादिनी ॥
**तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ !** ॥१॥
**तेषां च देहोऽद्भुतरूपगन्धो निरामयः स्वेदमलोज्झितश्च** ॥१०॥

यस्त्वपवादः –
आदि–मध्या–न्तभागेषु भ–ज–सामस्ति गौरवम् ।
लाघवं य–र–तामास्ते म–नोर्गौरव–लाघवम् ॥
कर्णः करतल एव च, पयोधर श्चलन–विप्रनामानौ ।
आर्या गणा गुरू स–ज–भवच्चतुर्लघ्विति प्राप्ताः ॥

ते चेमे –

**ऽ ॥ भः ।१।, ।ऽ। जः ।२।, ॥ऽ सः ।३।, । ऽऽ यः ।४।, ऽ । ऽ रः ।५।, ऽऽ । तः ।६।, ऽऽऽ मः ।७।, ।।। नः ।८।**

**ऽऽ कर्णः १, ॥ ऽ करतलः २, । ऽ । पयोधरः ३, ऽ ॥ चलनः ४, ॥– ॥ विप्रः ५ इति ॥**

आदिशब्दाद् गुरु–लघ्वादिग्रहः । त ग्रहणं स्वोपयोगार्थम् ।

**दैवत । अवेहि । सततं । रमायै । देवता । जानि( नी? )हि । भावार्थी । वरद । देवे । ( हे ) विपुला । अपार । केवल । हितकर । सा । हु ।१।**

**श्रीर्जय । जिनैर्हि । स शमैत् । इयं ते । रक्ष मां । त्वं मेऽसि । सन्तस्तोंऽश( स्तोष ? ) मिह । प्राहीं । नहि भीः । जयोऽस्तु । सा तत् । त्वमवसि । कैः । य ।२।।**

विवृजिन–मुनिजन–हितकर–मनुभवगुणविशदयशसमिह रमयेः ॥३॥

सुशील कला–कुल–कौशल देव
सुरासुर–मानव–निर्मित–सेव ।
मते तव देहि विभो ! मतिमेव
विराजति या किल चन्द्रकलेव ॥
अर्हदीयनामदामकुम्फने मनो ददीत यः
स मानितः सुधीषु भावुकं लभेत भूरि ॥४ ॥११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गणानां गणोऽत्र ।
ल-द-त-च्-प-ष मेक-द्वि-त्रि-चतुः-पञ्च-षट्कलम् ।
मात्रा-गणभिदो भू-द्वि-त्रि-पञ्चा-ऽ ष्ट-त्रयोदशाः ॥९२॥
तथाहि —
लघुरेको मता रेखा(।) ९३॥
गुरुर्दीर्घ इतीरितः (ऽ) १।
विदीर्घो लघुयुगलम् (॥) २॥ इति ॥९४॥
ल-ग-वत्तूर एव तु (।ऽ) १।
ल-ग वच्च विशेषः स्यात् (ऽ।) २।
न गणस्त्रि-लवत् पुनः (।।।) ।३॥
कथमयम् ? । प्रस्तावान्तरि[ता]त्वादपुनरुक्तत्ववत् परे च ॥९५॥
कर्णादयो द्विगुर्वाद्याः ।
पंक्तिचरत्वादव्यासेन । ये हि —
ऽऽ १, ॥ ऽ २, । ऽ । ३, ऽ ॥ ४, ॥ ॥ ५, इति ॥९६॥
**य** वदिन्द्रासनं विदुः ।ऽ १।
**र** वत् सूर इति ख्यातः ऽ। २।
**न-ग** वच्चाटुरित्यहो ॥ऽ ३।
**त** वदाचक्षते हीरम् ऽऽ। ४।
**स-ल** वच्छेखरं तथा ॥ऽ ५।
**ज-ल** वत् कुसुमावस्था । ऽ ॥ ६।
**भ-ल** वत् प्रोदितोऽस्त्यहिः ऽ ॥ ७।
पगणो **न-ल-**लात्मैव ।।।।। ८ ॥९७॥
**म** वच्च हरलक्षम् ऽ ऽ ऽ १।
**स-ग**वच्छशिनस्तत्त्वम् ॥ ऽ ऽ २।
**ज-ग** वत् सूरमूचिरे । ऽ । ऽ ३।
**भ-ग**वच्छक्रमाख्यान्ति ऽ ॥ ऽ ४।
शेषो **न-ल-ग**वत् स्मृतः ।।।। ऽ ५।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ल-त** वद्धरिव स्यात्  । S S ।  ६।

**र-ल** वत् कमलः किल  S । S ।  ७।

ब्रह्मा **न-ग-ल** वत् सिद्धः  ।।। S ।  ८।

**त-ल** वत् कृष्टिकल्पना  S S ।।  ९।

कमठः **स-ल-**लैश्चिन्त्यः  ।। S ।।  १०।

**ल-भ-**लैर्ध्रुवचिन्तनम्  S ।।।  ११।

**भ-ल-**लैरिह धर्माख्यः  S ।।।।  १२।

शालूरो लघुषट्तयः  ।।।।।।  १३।  इति ।।९८।।

किं च –

नेन्द्रवंशादिवृत्तानां शैथिल्यं परिहीयते ।

अयुग्मचरणप्रान्ते गुरुत्वं नास्ति तल्लघोः ।।

तदेव नैवं –

कारुण्यकेलीकलितो जिनेशित –

रावेद्यसे त्रीणि जगन्ति तायिता ।

जिनेश्वरो नः सततं भवार्णव –

तरीतया तिष्ठति सुप्रतिष्ठितः ।।

जिनपतिर्भगवानुदितोदय –

दयितदाक्ष्यदयादिगुणः श्रिये ।। इत्यादि ।।९९।।

व्यक्तेर्येषां तामा (नाम ?) पुनरुक्तवदाद्रियेत ते योगाः ।

युक्ते प्राश्रिते वा व्यञ्जनमात्रे पुरःस्थे स्युः ।।

**अक्षम् । इक्षुः । उक्षा । ऋक्ष । नृक्षितिः ।**

**अं । इं । उं । ऋं । लृं ।**

**अः । इः । उः । ऋः । लृः ।**

**क)(रोति । मुनि)(कुशलः । पटु)(कलावान् । ऋ )( कविः ( ? ) नृ )( क्षतिः। कः≍पचति । मति≍पट्वी । साधु≍पारगः । ऋ≍पुरं लृ≍पुत्रः।**

अक् । इक् । उक् । ऋक् । लृक् ।  इत्यादि ।।१००।।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

आद्येकवृत्तेर्युक्तस्य ह्रादेर्योऽनुचरो लघुः ।
नैषोऽपि परवन् मन्द-प्रयत्नोच्चार एव चेत् ॥
षट्तर्कागमचक्रकर्कशलसद्वादीन्द्रमुद्राद्रुम -
श्रेणीदाहदवानलः कलिमलप्रध्वंसह्रींकारवत् ॥
तीव्रप्रयत्नोच्चारे तु-
पद्मह्रदमुखादेषा गङ्गाख्या सरिदुत्थिता ॥
आदिज्ञापनान्मैवं -
तव निद्रा समुपागमदुच्चकैः सुमुखि ! शीघ्रमशेमहि ते वयम् ॥
एकग्रहान्मैवं -
मरुद्रथः खलु वारिद ! राजते, गगनमण्डलभूपतिवद्भवान् । इत्यादि ॥१०१॥
समा समं समानोत्था समानेभ्यः समुत्थिताः ।
सन्ध्यक्षरपरेभ्यस्ता विधास्तिस्त्रः स्वयम्भुवाम् ॥१०२॥
'**आ**'कार मुख्याः खलु पञ्च दीर्घाः
समैः समानैर्जनिता भवन्ति ॥
**आ । ई । ऊ । ॠ । ॡ** ॥१०३॥
ए-ओ इति द्वौ विषमैर्भवेतां ॥१०४॥
समान-सन्ध्यक्षर जौ तु ऐ-औ ॥१०५॥
मैलः पयसि पयोवत् पयसि सलिलवच्च धान्यकणवच्च ।
ॡ(ऌ)दन्तेष्वेदादिषु संयुक्तव्यञ्जने क्रमशः ॥
**अ अ** इत्यत **आ** इत्यादि ॥ एवं ऌकारान्ताः ॥५॥
**अइ १, आइ २, अई ३, आई ४**, इत्यतः **ए** ।
**अउ १, आउ २, अऊ ३, आऊ ४**, इत्यतः **ओ** ।
**अए १, आए २, अऐ ३, आऐ ४**, इत्यतः **ऐ** ।
**अओ १, आओ २, अऔ ३, आऔ ४**, इत्यतः **औ** ॥१०६॥
द्वावकारौ य आकार इति माऽभिग्रहं विधाः ।
न मैत्रः संभवेच्चैत्रो चैत्रद्विगुणचेष्टया ॥
अ अपेहीति वाक्यं च क्वाऽदात् कृपणसत्कृतिम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वेर्द्वयस्यां(?)(स्याऽ)न्यतामात्रा-गणितेर्भ्रान्तिभङ्गिनी ॥
अदितौ नैवमेकारो न तद्देशस्य यः स्वरे ।
कौम्भसः पयसो भेत्ता हंसश्चेद् वृद्धिरस्त्यपि ॥१०७॥
आस्ते निरनुबन्धत्वे जातिर्जीवातुरग्रणीः ।
इत्यन्यपरिषत्प्राप्तौ जातिस्तमनुवर्तते ॥१०८॥
दीर्घे दीर्घोऽपि लीयेत, दीप्तिमध्येऽन्यदीप्तिवत् ।
न याति वपुरुत्सेधं यौवनानन्तरं नृणाम् ॥
**अ आ, आ अ, आ आ**, इत्यत **आ** इत्यादि ॥१०९॥
ख-ठ-च-ज्रे फ-श-ष-सा-श्छ कारस्थ-फतुर्यहः ।
योगवाहा विसर्गश्चाऽनुस्वार )( क ≍ पमेव च ॥
**ख ठ च ज र श ष स छ थ फ घ झ ढ ध भ ह । अः अं )( क ≍ प ।**
यथोत्तरत्वं भावः । खादयोऽपि स्वर(रं) व्यञ्जनं वाश्रित्यैव हु ॥११०॥
किं च –
लिविप्रवाह एवायं याऽनुस्वारपुरोऽटवी ।
नान्त्यव्यञ्जनतश्चित्रा-लङ्कारः परिहीयते ॥
**क क का कं क कां का का**
**के कि के का कु का क कु प्** ।
**कौ कं कं क क को कै क** –
**का कं का क क का कु कां** ॥
पकारस्याऽप्यदोषात् ॥१११॥
ड-ल योरप्यनुस्वार-विसर्गाभाव-भावयोः ।
ब-वयोः स-षयोरैक्यं यथायुक्ति रलोः शसोः ॥
त-नयोर्ण-नयोस्तद्वत् क्वचिदिच्छन्त्यलंक्रियाः ॥११२॥
घोषे दोषापनोदाय षकारस्य सकारता ॥
णकारस्य ना(न)कारत्वं जकारस्य गकारता ।
**ष्ट ष्ण ज्ञ ( ? )** इति ॥११३।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किमूष्मत्वात् किमादेशात् किं युक्तव्यवहारतः ।
षस्य सान्तरता मध्य-वृत्तेः किं वा विशेषणात् ॥
नादिरूहो — संत्यागात् प्रकीर्णत्वाच्च नापरः ।
गनान्तरत्वापातोऽस्तु तृतीये ज-णयोरपि ॥
न तुर्यो भूपयोगित्वाद् हकारस्त्वेष घोषवान् ।
कवर्गीयमपेक्ष्यैव तत्सिद्धेर्नास्ति पञ्चमः ॥
अथ हाविवृतस्यास्य संवृतत्वमिवेति चेत् ।
देवानुप्रिय ! तत् सम्यगृलोरपि वितर्कय ॥११४॥
नाभेरुपरि आक्रामन् विवक्षाप्रेरितो मरुत् ।
हृदाद्यन्यतमस्थानो प्रयत्नेन विधाय(र्य)ते ॥
विधार्यमाणः स स्थान-मभिहन्ति ततः परम् ।
ध्वनिरुत्पद्यते सोऽयं वर्णस्यात्मा वितर्कितः ॥११५॥
स्वरतः कालतश्चैव स्थानतोऽपि प्रयत्नतः ।
अनुप्रदानतश्चेति विभागस्तस्य पञ्चधा ॥११६॥
षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा ।
धैवतश्च निषादश्च सप्तैते कथिताः स्वराः ॥११७॥
षड्जं मयूराः कूयन्ते गावस्त्वृषभनादिनः ।
अजादयश्च गान्धारं क्रोञ्चः क्वणति मध्यमम् ॥
उडरः पञ्चमं ब्रूते ह्रेषतेऽश्वस्तु धैवतम् ।
निषादं करिणो ब्रूयु-रेषा तेषामुदाहृतिः ॥११८॥
गान्धारश्च निषादः स्मृतावुदात्तेऽथ धैवतोऽप्यृषभः ।
द्वावनुदात्ते पञ्चम-मध्यम-षड्जास्त्रयः स्वरिते ॥११९॥

उच्चोच्चार उदात्तः स्या-न्नीचैरुच्चरितोऽपरः ।
स्वरितः समवृत्त्यैवो-च्चार्यमाणः स्वरो भवेत् ॥

**अ०** । **अ०** । **अ०** । इत्यादि ॥१२०॥

द्रुता विलम्बिता मध्या त्रिधेत्युच्चारवृत्तयः ।
अभ्यास उपदेशे च प्रयोगे च विनिश्रिता ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथाक्रममिति ॥१२१॥

ह्रस्व-दीर्घ-प्लुता एक-द्वि-त्रिमात्रा यथाक्रमम् ।

**अ इ उ ऋ ऌ । ए १ ऐ १ ओ १ औ १ । आ ई ऊ ॠ ॡ ए ऐ ओ औ । आ ३ ई ३ ऊ ३ ॠ ३ ॡ ३ ए ३ ऐ ३ ओ ३ औ ३** इति ॥१२२॥

व्यञ्जनं त्वर्द्धमात्रं स्यात् ।

**क ख ग घ ङ** इत्येवं हकारान्ताः ॥१२३॥

मात्राकालो निमेषकः ।

नेत्रस्पन्दनपरिमाण इत्यर्थः ॥१२४॥

परिपूर्णमनुत्पाद्य नार्द्धशब्दः प्रवर्तते ।

देशप्रदेशनिर्णीति-र्न स्कन्धेन विना यतः ॥१२५॥

पूर्विणोऽन्तुर्मुहूर्तेऽपि सर्वे सिद्धान्तपारगाः ।

रोगिणस्त्वक्षमा वक्तुं निमेषोऽन्यानपेक्षताम् ॥१२६॥

एकमात्रं वदेच्चाषो द्विमात्रं वक्ति वायसः ।

त्रिमात्रं बर्हिणो ब्रूयान्नकुलः सोऽर्द्धमात्रिकम् ॥१२७॥

स्मृत्वैव निनदाणूनां ह्रसनान्मुखदारणात् ।

आलोकान्तं प्लुतेश्चाहु-स्त्रैधमेषु समेष्वपि ॥१२८॥

दूरादामन्त्रणे प्रश्ने प्रश्नाख्याने च भर्त्सने ।

सम्मत्यसूयाकोपादौ यथायोगं स्वराः प्लुताः ॥

**देवदत्त ३ एहि । जिनदत्त ३ किं करोषि ? । सोमदत्त ३ राजानं पश्यामि** । इत्यादि ॥१२९॥

ऋकारं वर्जयित्वैकं सर्वस्यापि गुरोरिह ।

पर्यायेण प्लुतत्वं स्या-दपर्यन्तेऽपि तिष्ठतः ॥

**दे ३ वदत्त । देव ३ दत्त । देवद ३ त्त । देवदत्त ३ ।**

ऋकारवर्जनात् **कृ २ ष्टिः । वृ २ क्णं** । इत्यादि ॥१३०॥

उरः कण्ठस्ततो जिह्वा-मूलं तालु च मस्तकम् ।

दन्ता ओष्ठौ च नक्रं च वर्णानामष्ट भूमयः ॥

नहि दन्तेन दन्ताभ्यां वार्थ सततो (वार्थस्ततो) बहुत्वम् ॥१३१॥

कण्ठ्या अकुविसर्गं हः, ।

**अ आ क ख ग घ ङ ह अः** ॥१३२॥

तालव्या इचवौ यशौ ।

**इ ई च छ ज झ ञ य श** ॥१३३॥

शीर्ष्या ऋटुरषा ज्ञेयाः, ।

**ऋ ॠ ट ठ ड ढ ण र ष** ॥१३४॥

दन्त्या ऌतुलसास्तथा ॥

**ऌ ॡ त थ द ध न ल स** ॥१३५॥

उपूपध्मा मता ओष्ठ्याः, ।

**उ ऊ प फ ब भ म ⁀प** ॥१३६॥

एदैतौ गलतालुजौ ।

**ए ऐ** ॥१३७॥

**ओ औ** कण्ठोष्ठजौ ॥१३८॥ **वस्तु**, दन्तोष्ठ्यः परिकीर्तितः ॥१३९॥

जिह्वामूलीयको जिह्व्यः, ।

)( **क** ॥१४०॥

अनुस्वारो नाशिकोदितः ।

**अं** ॥१४१॥

स्यादुरस्यो हकारश्चे-दन्तस्था-पञ्चमैर्युतः ॥

**ह्ङ । ह्ञ । ह्ण । ह्न । ह्म । ह्य । ह्र । ह्ल । ह्व** ॥१४२॥

आदा उच्चरणं यस्या व कार-ल-ड-णां यथा ।

न तथा मध्यतोऽन्तेऽपि द्वित्वसंयोगतो विना ॥

ययु-लीला-तिलादिभ्यो द्विरुक्तललितोऽपि च ।

**यायाः, यायाः १ । वन्दे, देवं २ । लोलं , लोलं ३ । डिम्भः पण्डितः । नडः ४ । णीया । वणिक् ५ । ऋय्यं । इय्रतुः १ । सव्वं । काव्यं २ । मल्लः । शल्यं ३ । अड्डुति । जाड्यं ४ । पुण्णो । पुण्यं ५ । ययौ । येयीयते । यायाति । यियासति । अयीयपत् युः १ । व वौ २। ल लौ । ललति । लीला । तिलं ३ । डेडीयते ४ ।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विपरीतग्रहात्-**काव्यं । युयूषति । कल्पः ।**

क्वचित् समासैकपद्ये - **उद्यमः । प्रयोगः । निवातः । प्रलयः । प्रडीनः । प्रणवः ।**

उभयमपि क्वचित् - **अभियोगः । अभियोगः । प्रवीरः । प्रवीरः । भिलति । मिलति । तिमिंगिलगिलः** इत्यादि ॥१४३॥

परप्रीतिं विचिन्त्यैव नहि विघ्नाय नाशिका ।
अतः कार्याय जायन्ते पञ्चमा अनुनाशिकाः ॥

**ङ ञ ण न म** ॥१४४॥

प्रयत्नाः स्थान-करणं स्पृशन्त्यन्योन्यतो यदा ।
स्पृष्टता, — ॥१४५॥

— ऽथ मनाक् स्पर्शादीषत्स्पर्शत्वमिष्यते ॥१४६॥

पार्श्वतः संवृतिः(१४७) दूराद् विवृतिः(१४८) स्पृशतां भवेत् ।(१४८॥)

अमी अन्तः प्रयत्नाः स्युः,

स्पर्शेषत्स्पर्श-विवृति-संवृतय इति ॥१४९॥

बाह्यानपि विचिन्तय ॥

विवार-संवारादीनिति ॥१५०॥

वायुश्चाक्रमणं कुर्वन् मूर्ध्नि प्रतिहतो यदा ।
निवृत्तोऽसौ तदा कोष्ट-मभिहन्याद् बलादपि ॥
कोष्टेऽभिहन्यमाने गलबिलविवृतत्वतो विवारः स्यात् ॥१५१॥
तत्संवृतभावो यदि संवारो भवति कविकथितः ॥१५२॥

तत्र वर्ग्याः स्पर्शाः ।

**क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म ।**

)( **क** ≍ **प**, एतौ तदाश्रयात् ॥१५३॥

याद्या ईषत्स्पर्शाः ॥

**य र ल व** ॥१५४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वरोष्मका विवृताः ।

**अ आ इ ई उ ऊ ऋ ॠ लृ लॄ ए ऐ ओ औ । श ष स ह** ॥१५५॥

विवृततरावेदोतौ ।

**ए ओ** ॥१५६॥

विवृततमा **ऐ** च **औ** च ॥१५७॥

विवृते जायते श्वासः ॥१५८॥

संवृते नाद एव च ॥१५९॥

एतावनुप्रदानत्वे सद्भिः कैश्चिदगीयेताम् ।

"श्वास-नादावनुप्रदाने" इति **केचित्** ॥१६०॥

अनु-प्रदीयते नाद-स्तथाभूते यदा ध्वनौ ।

घोषता भवति (१६१), श्वासानुप्रदाने त्वघोषता ॥१६२॥

प्रथमे श-ष-साश्चैव - ईषच् श्वासतया स्थिताः ।

**क च ट त प, श ष स** ॥१६३॥

द्वितीयाः स्युर्बहुश्वासाः ;

**ख छ ठ थ फ** ॥१६४॥

अघोषास्ते त्रयोदश ॥

**क ख च छ ट ठ त थ प फ श ष स** ॥१६५॥

महाघोषाश्चतुर्थाः स्युः पञ्चमान्तस्थमेव हः ।

**घ ङ्ञ( झ )ञ ढ ण ध न भ म य र ल व ह** ॥१६६॥

स्वल्पघोषास्तृतीयास्तु ,

**ग ज ड द ब** ॥१६७॥

ख्यातो घोषवतां गणः ॥

**ग घ ङ ज झ ञ ड ढ ण द ध न ब भ म य र ल व ह** ॥१६८॥

अल्पप्राणत्वमेतेषा-मल्पे मरुति निश्चितम् ॥

**क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व** ॥१६९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महति त्वन्यता (१७०), हन्त महाप्राणतयोष्मता ॥

इहैके --

उं(उ)भावश्च विवृत्तिश्च शषसा रेफ एव च ।

जिह्वामूलमुपध्मा च गतिरष्टविधोष्मण: ॥१७१॥

आदि-द्वितीय-श-ष--सा जिह्व्योपध्मा-विसर्गका: ।

यमौ चादी अघोषा: स्यु: प्राप्ता विवृतकण्ठताम् ॥

**क ख च छ ट ठ त थ प फ श ष स )( क⌒प अ: कुं खुं** ॥१७२॥

गादयो विंशतिश्चैवा-नुस्वारश्चरमौ यमौ ।

संवृत्तकंठमिच्छन्तो घोषवन्त: समेऽप्यमी ॥

**ग घ ङ ज झ ञ ड ढ ण द ध न ब भ म य र ल व ह अं गुं घुं** ॥१७३॥

आद्यास्तृतीया वर्गाणां यमौ चादितृतीयकौ ।

अल्पप्राणा भवन्त्येते ,

**क ग च ज ट ड प ब कुं गुं** ॥१७४॥

महाप्राणा अतोऽपरे ॥

**ख घ ङ छ झ ञ ठ ढ ण थ ध न फ भ म य र ल व श ष स ह अं अ: )( क⌒प खुं घुं स्वराश्च** ॥१७५॥

नाशिक्या: स्युरनुस्वारयमा: ।

**अं कुं खुं गुं घुं** ॥१७६॥ **इत्यपरागम:** ॥

अघोषादिनाशिक्यान्तानामेतत् प्रकारान्तरं **वैदिकेष्टं** वेदितव्यम् ॥१७७॥

प्रयत्न: सर्वगात्रानु-सारी तीव्रतया यदा ।

निग्रह: स्याच्छरीरस्य कंठरन्ध्रस्य चाणुता ॥

स्वर-वाय्वोस्तु रूक्षत्व-मित्युदात्त: स्वरूपित: ॥१७८॥

प्रयत्न(त्नो)मन्दगात्र[स्य], स्त्रंसनादेस्ततोऽपर: ॥१७९॥

संनिपातस्तयोर्यस्तु स्वरित: सोऽयमीरित: ॥१८०॥

प्रयत्नानुप्रदानाना - मेतत् किंचन लक्षणम् ॥

स्पर्शादि स्वरितपर्यन्तम् ॥१८१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिपाटी प्रयोग्यात्मा स्वाश्रितादपराश्रितः ॥

**ह अं** ॥१८२॥

स्वराद् व्यञ्जनम् ॥

**औ का** ॥१८३॥

एकीयादनेकीयः प्रसीदति ॥

**लृ ए । घ ङ । झ ञ । ट ण । ध न । भ म लवत्** ॥१८४॥

कंठ्य-तालव्य-मूर्धन्य-दन्त्यौष्ठ्यानां प्रतीतया ।

स्थानानुमतवृत्त्यैव पौर्वापर्यविवेकिता ॥

**कु चु टु तु पु** ॥१८५॥

कथं तर्हि 'अ इ उ ऋ लृ' इति नोक्तम् ? ॥

ऋ-लृ वर्णौ विजातीया-वपि सावर्ण्यमृच्छतः ।

उवर्णानन्तरं तेन हेतुना तौ प्रतिष्ठितौ ॥१८६॥

ह्रस्वाद् दीर्घो विनिर्देश्यः ॥

**अ आ इ ई उ ऊ ऋ ॠ लृ ॡ** इत्यादि ॥१८७॥

प्राणैः स्वल्पान् महानपि ॥

**व श** ॥१८८॥

अवर्गीयस्तु वर्गीयात् ॥

**म य** ॥१८९॥

श्वासितो नादवानपि ॥

**ख ग । छ ज । ठ ड । थ द । फ ब । स ह** ॥१९०॥

ईषच्छ्वसाद् बहुश्वासः ॥

**क ख । च छ । ट ठ । त थ । प फ** ॥१९१॥

महाघोषोऽल्पघोषतः ॥

**ग घ । ज झ । ड ढ । द ध । ब भ** ॥१९२॥

आश्रयोत्पत्त्यपेक्षातो भावनीयाः पराश्रिताः ॥

**अः )( का )( क≍प ।१। अं अः** ॥१९३॥

स्वरा विंशतिरष्टौ च षट्त्रिंशद्व्यञ्जनानि च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुष्कं शेषमित्यष्ट - षष्टिस्ते लिखनान्तरे ॥

**अ अँ आ आँ इ इँ उ उँ ऊ ऊँ ऋ ऋँ ॠ ॠँ ऌ ऌँ ॡ ॡँ ए एँ ऐ ऐँ ओ ओँ औ औँ। क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य यँ र ल लँ व वँ श ष स अं अः )( क ≍ प** ॥१९४॥

अनुनाशिकेऽग्रगेऽपि स्वरः समर्थोऽनुनाशिकत्वाय ॥

'अपि'शब्दात् स्वतश्च ।

**साम सामँ। दधि दधिँ। मधु मधुँ। कर्तृ कर्तृँ। प्रियक्लृ प्रियक्लृँ। भवाँश्चारुः।** इत्यादि ॥१९५॥

य-व-लं नानुस्वारजम् ॥

**भ वा लँ लिखति १। स यँ यं त। स वँ वत्सरः। य लँ लोकं** ।२॥१९६॥

एषां लिपिरर्द्धबिन्दुमती। इदमेव लिखनान्तरत्वे फलम् ॥१९७॥

स्थानवृद्धिर्व्यनक्त्येतां गौणत्वेऽपि न तुच्छता।

अस्त्यर्ककिरणक्रान्तेः काचे काचीयतापि यत् ॥

अतः - **अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ। क ख ग घ, च छ ज झ, ट ठ ड ढ, त थ द ध, प फ ब भ, य र ल व, श ष स ह, अः )( क ≍ प** इति मुख्याः ॥ **अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ ऌँ ॡँ एँ ऐँ ओँ औँ ङ ञ ण न म यँ लँ वँ** इति मुखनाशिक्याः ॥ **अं** नाशिक्यः ॥

**अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ। क ख ग घ च छ ज झ ट ठ ड ढ त थ द ध प फ ब भ य र ल श ष स ह अं अः )( क ≍ प** इत्येकस्थानीयाः ॥

**अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ ऌँ ॡँ ए ऐ ओ औ ङ ञ ण न म यं लं व** इति द्विस्थानीयाः ॥ **एँ ऐँ ओँ औँ वँ** इति त्रिस्थानीयाः ॥१९८॥

अवर्णादेः स्वरस्याद्या ह्रस्व-दीर्घ-प्लुतैस्त्रिता।

उदात्तत्वेऽनुदात्तत्वे स्वरितत्वे स्थिता पृथक् ॥

तेषामप्युभयी मुख्य-मुखं नाशिक्यभावतः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्येकैकस्य संख्यातः सर्वे द्वाषष्टियुक् शतम् ॥

उच्चारापेक्षया वर्णा द्वे शते द्व्यधिके मताः ॥

समस्याकारणं –

△ अ । ▽ अ । □ अ । △ अँ । ▽ अँ । □ अँ । △ आ । ▽ आ । □ आ । △ आँ । ▽ आँ । □ आँ । △ आ ३। ▽ आ ३। □ आ ३। △ आँ ३। ▽ आँ ३। □ आँ ३। △ इ । ▽ इ । □ इ । △ इँ । ▽ इँ । □ इँ । △ ई। ▽ ई । □ ई । △ ईँ । ▽ ईँ । □ ईँ । △ ई ३। ▽ ई ३। □ ई ३। △ ईँ ३। ▽ ईँ ३। □ ईँ ३। △ उ । ▽ उ । □ उ । △ उँ । ▽ उँ । □ उँ । △ ऊ । ▽ ऊ । □ ऊ । △ ऊँ । ▽ ऊँ । □ ऊँ । △ ऊ ३। ▽ ऊ ३। □ ऊ ३। △ ऊँ ३। ▽ ऊँ ३। □ ऊँ ३। △ ऋ । ▽ ऋ । □ ऋ । △ ऋँ । ▽ ऋँ । □ ऋँ । △ ॠ । ▽ ॠ । □ ॠ । △ ॠँ । ▽ ॠँ । □ ॠँ । △ ॠ ३। ▽ ॠ ३। □ ॠ ३। △ ॠँ ३। ▽ ॠँ ३। □ ॠँ ३। △ लृ । ▽ लृ । लृ। △ लृँ । ▽ लृँ । □ लृँ । △ लॄ । ▽ लॄ । □ लॄ । △ लॄँ । ▽ लॄँ । □ लॄँ । △ लॄ ३। ▽ लॄ ३। □ लॄ ३। △ लॄँ ३। ▽ लॄँ ३। □ लॄँ ३। △ ए १। ▽ ए १। □ ए १। △ एँ १। ▽ एँ १। □ एँ १। △ ए । ▽ ए । □ ए । △ एँ । ▽ एँ । □ एँ । △ ए ३। ▽ ए ३। □ ए ३। △ एँ ३। ▽ एँ ३। □ एँ ३। △ ऐ १। ▽ ऐ १। □ ऐ १। △ ऐँ १। ▽ ऐँ १। □ ऐँ १। △ ऐ । ▽ ऐ । □ ऐ । △ ऐँ । ▽ ऐँ । □ ऐँ । △ ऐ ३। ▽ ऐ ३। □ ऐ ३। △ ऐँ ३। ▽ ऐँ ३। □ ऐँ ३। △ ओ १। ▽ ओ १। □ ओ १। △ ओँ १। ▽ ओँ १। □ ओँ १। △ ओ । ▽ ओ । □ ओ । △ ओँ । ▽ ओँ । □ ओँ । △ ओ ३। ▽ ओ ३। □ ओ ३। △ ओँ ३। ▽ ओँ ३। □ ओँ ३। △ औ १। ▽ औ १। □ औ १। △ औँ १। ▽ औँ १। □ औँ १। △ औ । ▽ औ । □ औ । △ औँ । ▽ औँ । □ औँ । △ औ ३। ▽ औ ३। □ औ ३। △ औँ ३। ▽ औँ ३। □ औँ ३।

क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ भ म य यँ र ल लँ व वँ श ष स ह अं अः )( क⌢प ॥२०२॥१९९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्भेदतारतम्यं तु कोटित्वेऽपि न निष्ठितम् ॥२००॥

यथेदम् —

जघन्यात् परमं यावत् क्षेत्र-कालैर्विशेषिताः ।

असंख्येया भवन्त्येते ; ।

सर्वजघन्यावगाहकाद् वर्णादेकैकप्रदेशवृद्ध्या सर्वोत्कृष्टावगाहकं वर्णं यावत् क्षेत्रापेक्षयाऽसंख्येया वर्णा भवन्ति ।१। सर्वजघन्यस्थितिकादेकैकसमयवृद्ध्या सर्वोत्कृष्टस्थितिकं यावत् कालापेक्षयाऽसंख्येया वर्णा भवन्ति ।२। २०१॥

— पर्ययांशैस्त्वनन्तकाः ।

सर्वजघन्यप्रदेशिकादेकैकपर्ययवृद्ध्या सर्वोत्कृष्टपर्ययं यावत् पर्ययापेक्षयाऽनन्ता वर्णा भवन्ति ।२। ॥२०२॥

दिवसाद् बत मासस्य यथा नैकान्तमेकता ॥

अनुदात्तादुदात्तस्य तथा नैकान्तमेकता ॥

तीव्र-मन्दादिभावैश्चेत् कर्मोदर्कविचित्रता ।

क्षमाक्रोधादिकाकर्षैः किमेषामर्थतुल्यता ? ॥

अर्थान्तरत्वे युक्तिश्चेत् सा वर्णान्तरता न किम् ? ।

देवो देहान्तरावासौ सोऽयमित्येव मा ग्रहीः ॥२०३॥

अवर्णौ युगपत् प्राप्ता – विवर्णेनाऽनुरुध्यतः ।

एत्वमेव क्रमित्वे तु ऐकारत्वाय सज्जतः ॥२०४॥

नैकारादिचतुष्कस्य ह्रस्वात् केचन मन्वते ॥२०५॥

लृवर्णे दीर्घमप्येके वारयन्ति निरंकुशीः (शाः) ॥२०६॥

आकृत्या सिद्धिरिति चे- दैत औतश्च फल्गुता ।

त्र्यंशतायाः प्लुतत्वं स्या-न्न प्लुतो लिपिगोचरः ॥

स्थानसंख्या प्रमाणं चे-दाकाराद्यवमाननम् ।

*अनुनाशिक-वानां* च *कादिभ्योऽधिकता भवेत्* ॥

आदिं विना न मध्यत्वं नेदुत् प्रतिपदं पुनः ।

वंशानुपातिनी मात्रा ह्रस्वाः पञ्च तु रूढितः ॥

एकादिवर्षप्रमिताः क्रमेण कस्यापि बाला लघु-मध्य-वृद्धाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यस्य ते द्व्यादिशरत्प्रमाश्चेत् कश्चेतनावान् बलवद्विवादी ॥
शक्तितावत्तया बालानुग्रहे दीर्घनामनि ।
भूपतिः सिंह इतिवत् समासो लुप्तसंज्ञकः ॥२०७॥
लृतः प्रतिमा-सन्धी, भवतो यदि दीर्घतैवैति ।
पाठविभङ्गोऽपरथा वियौवनं जीवितं वा ॥

**लृ-लृकारः लृकारः ।**

अपि च-सिद्धो वर्णसमाम्नायः । तत्र चतुर्दशादौ स्वराः । दश समानाः। तेषां द्वौ द्वावन्योन्यस्य सवर्णौ । पूर्वो ह्रस्वः । परो दीर्घ इत्यादि ॥२०८॥

**इति परिसमाप्तं संस्कृताख्यं सरस्वतीधर्मः ॥**

अतः परं प्राकृतं भवियति ॥

ॐ नमः पार्श्वाय ॥

ऋ -लृ वर्ण-ङ-ञा ऐ औ तालव्य-श-शिरस्य-षौ ।
)( क ⌣ पौ प्लुत-विसर्गौ च प्राकृते न चतुर्दश ॥

**अ आ इ ई उ ऊ ए ओ क ख ग घ च छ ज झ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व स ह अं** ॥२१०॥

सर्वोदाहरणस्य —

**ठाणं झाण[फ]लस्स मुत्ति-पुढवी-मेहं खमा-मुं( मं? )डिओ**
**जं देवं थुइ मंगलेण मणसा छत्ताइ-भूसंचियं ।**
**वीरं वंदइ धम्मकप्पतरुणो बीयं व मत्तू णतं ( सत्तूणतं ? )**
**घोरन्नागमकंटकक्खयकए पाए वयं वंदिमो** ॥२११॥

ए-ओ लघुतयाऽपीष्टौ ;

**एवं मए पुट्ठे महाणुभावे इणमब्बवी कासवे आसुपन्ने** ॥२१२॥

बिन्दुमन्तावि-ई तथा ।

**अड्ढा[इ]ज्जेहिं राइंदिएहिँ पत्तं चिलाईपुत्तेण** ॥२१३॥

अव्यञ्जनेऽप्यनुस्वारः ;

**स-गणहराणँ च सव्वेसिं** ॥२१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यञ्जनं त्वादि-मध्यगम् ॥

इदमपेक्ष्यैवैके —

एकाकिनोऽपि राजन्ते सत्त्वसाराः स्वरा इव ।
व्यञ्जनानीव निःसत्त्वाः परेषामनुयायिनः ॥२१५॥

स्व-स्ववर्गपरौ स्यातां , ङ- ञौ ; -

**ङ्क ङ्ख ङ्ग ङ्घ । पङ्को । सङ्खो । अङ्गणं । लङ्घणं ॥ ञ्च [ञ्छ ञ्ज] ञ्झ । कञ्चुओ । लञ्छणं । अञ्जियं । सञ्झा** ॥२१६॥

ऐ-औ च कुत्रचित् ॥

**कैअवं । कौरवा** ॥२१७॥

र-हाभ्यां ङ-ञ-यैरूना द्वित्विनः षट् च विंशतिः ॥

**क्क क्ख ग्ग ग्घ च्च च्छ ज्ज ज्झ ट्ट ट्ठ ड्ड ड्ढ ण्ण त्त त्थ द्द द्ध न्न प्प प्फ ब्ब ब्भ म्म ल्ल व्व स्स** ॥

**विमुक्को भवदुक्खाओ निसग्गजिणवग्घत्तं ।**
**अच्चंतलच्छीविज्जाणं मज्झे वट्टसि सुट्ठिओ** ॥
**अगड्डुरिय सीलड्ढि-पुण्णो जुत्तत्थ सद्दवी ।**
**सुद्धविन्नाणसिप्पो सि पप्फुडं सुमहब्बलो** ॥
**निब्भरं धम्ममल्लो सि सव्वस्स हियदेसओ** ॥२१८॥

**शौरसेन्यां** त्वमी एव यकारेणाऽधिका मताः ॥

एवकारोऽद्वित्वानामविशेषार्थः ॥

**क्क क्ख ग्ग ग्घ च्च च्छ ज्ज ज्झ ट्ट ट्ठ ड्ड ड्ढ ण्ण त्त त्थ द्द द्ध न्न प्प प्फ ब्ब ब्भ म्म य्य ल्ल व्व स्स** ॥

**सक्कारं । मुक्खो । वग्गो । अग्घो । मुच्चदि । गच्छिदूण । पज्जलं । झुज्झदि । वट्टं । चिट्ठदि । गड्डहो । अड्ढो । कण्णो । पत्तो । तित्थं । मद्दणं । मुद्धे । संपन्ना । सप्पो । भिप्फो । दुब्बलो । गब्भो । सुकम्मं । अय्यउत्त । सल्लो । अपुव्वो । तस्स** ॥२१९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वोदाहरणस्य –

**जो कज्जं न करेदि रीदि-विसढं मुच्छा-ठिदी-खेडओ**
**धम्मे जेण पवट्टिदा स ( ? ) भगवदा बोही थिरप्पा फुडं ।**
**सच्चे जस्स जसो न झिज्झदि पहू तेलुक्ककल्लाणवी**
**सो सिग्घं हिदहेदुदिक्खदयिदो भावच्चिदो भोदु मे ॥२२०॥**

य-लयोः पुरतो हः स्यात् ; –

**य्ह । ल्ह ॥ तुय्ह । ल्हिक्कइ** ॥२२१॥

ण-म-नां स्वेऽपि साम्प्रताः ॥

**ण्ट । ण्ठ । ण्ड । ण्ढ । ण्ण । ण्ह ॥**

**कण्टओ । उक्कण्ठा । कण्डं । सण्ढो । पुण्णो । तण्हा ॥**

**न्त । न्थ । न्द । न्ध । न्न । न्ह ॥**

**अन्तरं । पन्थो । चन्दो । बन्धवो । वन्नो । मज्झन्हो ॥**

**म्प । म्फ । म्ब । म्भ । म्म । म्ह ॥** व्युत्क्रमात् **म्व ।**

**गुम्पइ । गुम्फो । लिम्बो । रम्भा । अम्मो । तम्वं । अम्हे** ॥२२२॥

दकारस्य भवेद् रेफः ; –

**द्र । चंद्र** ॥२२३॥

चकारस्य मतो म् (?) ॥

**च्म । रुच्मी ॥**

प्राकृत-शौरसेन्योरिति वर्तते ॥२२४॥

**इति परिसमाप्तं प्राकृतं सरस्वतीधर्म शौरसेनी च ॥**

अतः परं **मागधिकं** भविष्यति ॥

ॐ नमः पार्श्वाय ॥

जिह्व्या तालव्य-शोर्भावा-दभावाज्ज-र-दन्त्यसाम् ।
**मागध्यामवशिष्यन्ते** पञ्चाग्र-दशभिर्विना ॥

**अ आ इ ई उ ऊ ए ओ । क ख ग घ , च छ झ , ट ठ ड ढ ण , त थ द ध न ,प फ ब भ म , य ल व ; श , ह , अं )( क** ॥२२६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वोदाहरणस्य –

**यं पत्ते मघवं फणी खु कलुणासिंगालभूदं झयं**

**ये शम्मत्तघडे तधा छलमढा दुट्ठा य हीलन्दि यं ।**

**ये शव्व )( किय लोश प )( क विमुहे यम्हा पवट्ठा नया**

**शे मिश्चत्त चलित्तबंधलहिदे भावत्थदे होदु मे** ॥२२७॥

द्विता षड्विंशतिर्दन्त्य–स–आसि–श–ट–हानितः ॥

**क्क क्ख ग्ग ग्घ च्च च्छ ज्झ ञ्ञ ट्ठ ड्ड ड्ढ ण्ण त्त त्थ द्द द्ध न्न प्प प्फ ब्ब ब्भ म्म य्य ल्ल व्व स्स** ॥

**पक्के । तिक्खे । अग्गे । शिग्घे । शच्चे । लच्छी । बुज्झे । पुञ्ञा । लट्ठे । तुड्डदि । बुड्ढे । पण्णा । शुत्ते । शत्थे । मुद्दा । बद्धे । अन्ने । लुप्पी । पप्फोडिदे । दुब्बोही । डिब्भे । शम्मे । अवय्य । कल्लं । शव्वं । भगदत्तस्स** ॥२२८॥

च–वौ तालव्यशः स्यातं(तां ?) ; –

**श्च श्व । उश्चलदि । तवश्वा मे जणणी** ॥२२९॥

टकारः शीर्ष्य–षः पुरः ॥

**ष्ट । चिष्टदि** ॥२३०॥

दन्तीयसस्य क–ख–टा ण–त–पाः फ–म–साः ॥

**स्क, स्ख, स्ट, स्ण, स्त, स्प, स्फ, स्म, स्स** ॥

**मस्कली । पस्खलदि । पस्टे । विस्णुं । उवस्तिदे । बुहस्पदी । निस्फलं । उस्मा । देवदत्तस्स** ॥

उचितशेषास्तु – **ङ्क ङ्ख ङ्ग ङ्घ ञ्च ञ्च ञ्छ ञ्झ ण्ट ण्ठ ण्ड ण्ढ न्द न्त न्थ न्ध म्प म्फ म्ब म्भ म्व म्ह य्ह ल्ह** ॥

**शङ्के । शङ्खे ।** इत्यादि ॥२३१॥

**इति परिसमाप्तं मागधीनाम सरस्वतीधर्म** ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत: परं **पैशाचिकं** भविष्यति ॥२३२॥

ॐ नमः पार्श्वाय ॥

पैशाच्यां द–ण हीनत्वात् षोडशानामशं(सं ?)चरः ॥

**अ आ इ ई उ ऊ ए ओ । क ख ग घ च छ ज झ ट ठ ड ढ त थ द ध न प फ ब भ म य र ल व स ह अं** ॥२३३॥

सर्वोदाहरणस्य –

**कम्मानं घन गंठि कट्टन कलावूढो कुठारव्व जो**
**सज्झायस्स खने थुवंति मुनिनो पुच्छा( ? ) पतीपो त्ति जं ।**
**जो पासंडिक–भिप्फ–वात–विजयी सो बंभचेरुद्धरं**
**मग्गं पास [प] हू पयच्छतु सता लोगग्गचूजामनी** ॥२३४॥

त्रपदे त्र–ञकारासे द्वित्व–षड्विंशतिर्भवेत् ॥

**क्क क्ख ग्ग ग्घ च्च च्छ ज्ज ज्झ ञ्ञ ट्ट ट्ठ ड्ड ड्ढ त्त त्थ द्ध न्न प्प प्फ ब्ब ब्भ म्म य्य ल्ल व्व स्स** ॥

**पञ्ञा । पठिय्यते** । इत्यादि । चंत्रं ॥

उचितशेषास्तु – **ङ्क ङ्ख ङ्ग ङ्घ ञ्च ञ्छ ञ्ज ञ्झ ण्ट ण्ठ ण्ड ण्ढ न्त न्थ न्द न्ध म्प म्फ म्ब म्भ म्व म्ह य्ह ल्ह** ल्ह(?) ॥ **पङ्के** इत्यादि ॥२३५॥

तृतीय–तुर्यान्नैवाख्यु–**श्रूलापैशाचिके** पुनः ॥

**अ आ इ ई उ ऊ ए ओ । क ख च छ ट ठ त थ न प फ म य र ल व स ह अं** ॥२३६॥

सर्वोदाहरणस्य –

**मोहं फेटति चो कसाय कटनो तूरो कुनप्पा चयी**
**सक्के पूचति चस्स पुव्वपटिमं तेवाथिरा चो मुता ।**
**चो काठं परतुक्ख–फंचि–फकवं वानी–सुथा–निच्छरो**
**सामी आतिजिनेसलो तिसतु मे थम्मोतयं मंकलं** ॥

परेषां प्रणिषिध्यन्ते नादियुज्योरमी अपि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गती । घम्मो । जीमूतो । झच्छरो । डमलुको । ढक्का । दामोतरो । धम्मो । बालको । भकवती ॥**

नियोजितं **इत्येकेषाम्** ॥२३८॥

द्व्यात्मता गादिनवकोनत्वात् सप्तदशसु ॥

**क्क क्ख च्च च्छ ञ्ञ ट्ट ट्ठ त्त त्थ न्न प्प प्फ म्म य्य ल्ल व्व स्स ॥**

**सक्को । सुक्खं ।** इत्यादि ॥

उचितशेषास्तु – **ङ्क ङ्ख ञ्च ञ्ज ञ्छ ण्ट ण्ठ न्त न्थ म्प म्फ म्व म्ह य्ह ल्ह । पङ्के** इत्यादि ॥२३९॥

**इति परिसमाप्तं पैशाचिकं तच्चूला च सरस्वतीधर्म ॥**

अतः **परमपभ्रंशो** भविष्यति ॥२४०॥

ॐ नमः पार्श्वाय ॥

अपभ्रंशे त्वृञन्यासाद् द्वादशोनितसंग्रहः ॥

**अ आ इ ई उ ऊ ऋ ए ओ । क ख ग घ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व स ह अं** ॥२४१॥

सर्वोदाहरणस्य –

**जं भवियण फासइ निम्मल-दंसण-सुग्घें बुञइ चरित्त सुहं**
**जं तृणसम जाणइ पर घर लच्छी जं देखइ नहि मूढ मुहं ।**
**थिर धम्म न छंडइ कटरि न वग्गइ जं सुविसुज्झइ सीलबलं**
**जगजीव-दिणेसर सिवपहवेसर इइ सव्वं तुह भत्तिफलं** ॥२४२॥

अय्हे स्मिन् मेति वं हो नं ॥

**न्व ह्न । प्राइम्व । गृह्णेप्पिणु । अय्ह** इति तर्हि य्हनिषेधः ॥२४३॥

मतोध्र्रः प्रादयस्तथा ॥

**प्र, ध्र्र** इत्यादि । **प्रिय । तुद्ध्र** । इत्यादि ॥२४४॥

द्विता प्राकृतवत् ॥

क्कादयः षड्विंशतिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**एक्क । सिक्खेइ । लग्गवि । सुग्धें । सच्च । उच्छंग । जज्जरि । सुज्झ । बेट्ठी । दिट्ठि । वड्डा । डड्ढ । सुवण्ण । वत्तडी । एत्थु । महद्दुमु । दिद्ध । दिन्नी । घिप्पंति । निप्फलं । दुब्बल । गब्भ । छम्मुह । हेल्हि । सव्वु । सुअणस्सु** ॥२४५॥

न्याय्यावशेषास्तु समेष्वपि प्राकृतवदिति वर्तते ॥ समशब्दाच्छौरसेन्यादयः ।

**ङ्क ङ्ख ङ्ग ङ्घ ञ्च ञ्छ ञ्ज ञ्झ ण्ट ण्ठ ण्ड ण्ढ द्द न्त न्थ न्द न्ध म्प म्फ म्ब म्भ म्ह ल्ह ॥ पङ्क, स्सु** इत्यादि ॥२४६॥

व्यत्ययश्च भवेत् ॥ समेष्वपीति वर्तते ॥ प्राकृतेऽपि ॥

**स्म, ह्न । अस्माकं । गिह्नंति** ॥

सिद्धिरनेकान्तादिति भगवानपि ॥२४७॥

यत्तु लौकिकं तदशुद्धवत् निरर्गलत्वाद् , अतः परं लोकाः । यथा –

**कर्यो करायो भावसुं जौ जिनपूज उच्छाह ।**

**सम्यकवंत तुही मुगति गैलै सारथवाह ॥१॥** इत्यादि ॥

'अशुद्ध' शब्दोऽल्पशुद्ध्यर्थः ॥ मा भूदपार्थतेति ॥२४८॥

**प्रकृतिः प्राकृतं चैव शौरसेनी च मागधी ।**

**पैशाचिकमपभ्रंशो वाचः** षडनुपूर्वशः ॥

प्राकृतस्य ता(त)द्धितप्रामाण्यात् प्रकृतिः संस्कृतमित्यर्थः ॥

**परिसमाप्ता वाक् षडङ्गी हंसलिविश्च** ॥२४९॥

— x —

**इदानीं विद्या ॥**

अ इ उ ऋ लृ च ए ऐ ओ औ त तः परम् ।
ह यं व र ल वच्चैव ङ क खं घ ग वत्ततः ॥
ञ च छ झं जसम्पृक्तं ण ट ठं ढ ड संयुतम् ।
न त थं ध द संयुक्तं म प फं भ ब वत् पुनः ॥
श ष श इति नव ते वर्गा **भूतलिपौ** मताः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अ इ उ ऋ लृ ए ऐं ओ औ। ङ य व र ल। ङ क ख घ ग, ञ च छ झ ज, ण ट ठ ढ ड, न त थ ध द, म प फ भ ब, श ष स ॥२५०॥

एकैकवर्णोद्धारेण वियद् वाताग्निवार्भुवः ॥

अ ए ह ङ ञ ण न म श — व्योम १।

इ ऐ य क च ट त प ष — वायुः २।

उ ओ व ख छ ठ थ फ श — अग्निः ३।

ऋ औ र घ झ ढ ध भ — जलम् ४।

लृ ल ग ज ड द ब — पृथिवी ५।

**भौतीयम्** ॥२५१॥

ऐँ नमः ॥

अकार मौलिर्मिलिताऽसि मञ्जुलं, त्वमेव मातर्विपुलामलश्रिया ॥२५२॥
त्वदास्यमातंस्तुमहेतरां भृश–प्रसन्नशोचिः श्रुतदेवते ! वयम् ॥२५३॥
इवर्णनेत्रा जगतीर्विलोकसे (२५४), उवर्णकर्णे शृणु सेवकोऽस्म्यहम्। (२५५)
ऋवर्ण–घोणाऽसियशःसुमार्चना (२५६), लृवर्णगंङां (ण्डां ?) भवती जिनो गतः ॥(२५७)

मदीयमेदैद्दश नालियामला दुरूहमागः कुरु चारुचर्बणा।

सपरिम्भिव एओ नयाविनाशात् ऊद्धर्वमधश्च (?) ॥२५८॥

पटिष्ठमोदौद्विदितौष्टिचेष्टतां भवत्यरित्रासकरी वरीयसी। ॥२५९॥

ब्रवीष्यनुस्वाररसज्ञया प्रियं वचः(२६०) वहन्त्यब(म्ब) विसर्गकन्धराम।

वर्त्तस इत्यध्याहारः ॥२६१॥

तमोऽम्बु तर्त्तुं भजसे भुजौकुभू(ञ्रू) ; –

**क ख ग घ ङ, च छ ज झ ञ** मिति ॥२६२॥

शिवाध्वगायाश्चरणौ टु–तू तव।

**ट ठ ड ढ णं , त थ द ध न** मिति ॥२६३॥

पण प्रसूतिः प–फ कुक्षिरीक्ष्यसे ;

सर्वत्रोभयं दक्षिण–वामतः ॥२६४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न वज्रजेयाऽसि वरीढका (२६५) इहयां (?),

भ-वनाभिमाहुर्मुनिलक्ष्यलक्षणा(ण)म् ॥२६६॥

अनीदृशं मो रसमिद्धमेधसः ।

यामिति गम्यम् ॥२६७॥

न तत्र चित्रं यदि यादि धातुमत् त्वदङ्गमुच्चावचविश्वबीजवत् ।

य र ल व श ष सा रा(र) साऽसृग्मांस-मेदो-ऽस्थि-मज्ज(ज्जा)-शुक्राणि ॥२६८॥

हकार सुश्वासिनि धर्मधीमतां भवत्प्रसादाद् भृशमायुरेधताम् ॥२६९॥

नमो भवत्यै भुवि जीवतालमे(?)ऽनवद्यविद्या मम देव्युदीयताम् ॥२७०॥

क्ष इत्यकर्माणमुपैषि पर्ययं क्रियाद् द्रुतं दारुणदुर्गतिक्षयम् ॥

अतः — **अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ, अं अः । क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह लं क्षः** ॥२७१॥

अर्हन्तोऽजा अथाचार्या उपाध्याया मुनीश्वराः ।

मिलित्वा यत्र राजन्ते तदोंकार पदं मुदे ॥

**अ अ आ उ म्** ॥२७२॥

बीज-मूल-शिखा कात्स्न्र्य-मेकक-त्रि-त्रि-पञ्चभिः ।

अक्षरैरोंनमः सिद्धं जपानन्तफलैः क्रमात् ॥

**ॐ १। ॐ नमः २ सिद्धं । ॐ** इत्यनुवर्तते ॥

नन्ता हन्त भवत्येको भवत्येकश्च शंसिता ।

शंसिता लभते कामान् नन्ता लभति वा न वा ॥३॥

**ॐ नमः सिद्धम्** ॥२७३॥

हूमर्हद्धरणाचार्यो-पाध्यायमुनिगोचरम् ।

**ह् र् उ उ म्** ॥२७४॥

सूर्युपाध्यायमुनयः स्पृशन्त्यूंकारमादरात् ॥

**उ उ म्** ॥२७५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आं जिनाऽजनुराचार्य-मुनितः प्रादुरस्तीह(स्ति ह) ॥

**अ अ आ म्** ॥२७६॥

अर्हद्धरणवाग्देव्यो ह्रींकारस्य निबन्धनम् ॥

**ह् र् ई** ॥२७७॥

आद्युपान्त्यान्तिमार्हन्तो गीश्चाऽर्हं पदमास्थिताः ।
ज्ञान-दर्शन-चारित्र-मुक्तयो भान्ति तत्र वा ॥

**अ र् ह् अं** ॥२७८॥

श्रींकारे श्रुत-धरणौ पद्मावत्यृषयः परम् ॥

**श् र् ई म्** ॥२७९॥

ह्रोमर्हद्धरणादेह-वाचकर्षिजमीरितम् ॥

**ह् र् अ उ म्** ॥२८०॥

अर्हन्त धरणादेहै-स्तपसा ह्रः समाश्रितम्(तः १) ॥

**ह् र् अ स्** ॥२८१॥

हंसो जिनाऽजनुर्योगी श्रद्धा-श्रुत-तपांसि चेत् ॥

**ह् अ म् स् अ स्** ॥

**अत्यल्पमेतत् । याक्षीयम्** ॥२८२॥

— x —

स्वरा अ इ उ ए ओ स्यु-रोष्ठ्य-बं तालवीय-शम् ।
मुक्त्वा व्यञ्जनजातिः स्या-दित्येवोडुलिपेर्गणः ॥

**अ इ उ ए ओ । क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ – भ म, य र ल व ष स ह। इत्यतः – अ व क ह ड, म ट प र त, न य भ ज ष, ग स द च ल। घ ङ छ, ष ण ठ, ध फ ढ, ञ झ थ। अ इ उ ए कृत्तिका, ओ व वि वु रोहिणी,** इत्यादि ॥ **नाक्षत्रीयम्** ॥२८३॥

आदयः कादयो ज्ञेयाः ख-गौ घ-ङौ परस्परम् ।
वर्गान्तरेणाऽन्ये वर्णा **मूलदेवस्य** भाषिते ॥
क का कि की कु कू के कै को कौ कं कः । अ ग ख ङ घ ट ठ ड

ढ ण, च छ ज झ ञ, प फ ब भ म, त थ द ध न, श ष स ह, य र ल व ॥

**मूलदेवीयम्** ॥२८४॥

**हंसी भौती च याक्षी च , नाक्षत्री मूलदेव्यपि ।**
**राक्षसी द्रविडी नाटी , मालवी लाटि-नागरी ॥**
**तौरष्की पारसीकी च यावनी कीरि-सैन्धवी ।**
**अनिमित्ताऽपि चाणाकी लिपयोऽष्टादशाऽप्यमूः ॥**

ब्राह्यै दत्ता भगवता, तन्नाम्ना विश्रुताऽस्तु ॥

आदिदेवेन ब्राह्मीसंज्ञितायै पुत्र्यायिति ॥ "**नमो बंभीए लिवीए**" इति प्रवचनं च ॥

सर्वं सुकरमभ्यस्त-सम्प्रदायादयो यदि ।
आहोपुरुषिकाहेतो-र्मा वक्र-जडताऽस्तु नः ॥
इति तु शब्दार्थः ॥२८५॥

**इति परिसमाप्तो यथावाप्तो लिपिनिर्देशः ॥**

— x —

अतः परं **मीमांसा** भविष्यति ॥२८६॥

ॐ नमः पार्श्वाय ॥

शिष्यानुमोदिनी तासा-मियं पर्यायतोऽजनिः(नि) ।
वस्तुतोऽनादयः सर्वाः स्थावर-त्रसवद् गिरः ॥

नाऽऽसीत् , न भविष्यति वा समयो यत्र नाऽभूवंस्त्रसा न भविष्यति (न्ति) स्थावरा वेति ॥२८७॥

नित्यताऽनित्यताऽस्तित्व-नास्तित्वादिविशेषणैः ।
अनन्तैर्भारतीर्विद्या-स्तटिनीरिव भङ्गिनीः ॥

नहि विशेष्यस्य विशेषणानि संख्येयान्यसंख्येयानि वेति वक्तुं पार्यते ॥२८८॥

इवर्णस्य कथं यत्वं नित्यतैकान्तमस्तु चेत् ।
अनित्यतैव चेदास्ते स एवार्थगमः कथम् ? ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**दद्ध्यानय । दधि आनयेत्यर्थः ॥**

**मीमांसक – सौगतान्मोहः** ॥२८९॥

व्यतिरेकाद् भवापायौ घटस्यान्वयतः स्थितिः ।

यदि किं न तदाऽश्लेषि घटयोरपि तत्त्रयम् ॥

वाच्यानुबद्धं हि वाचकम् । यत्किंचित् त्रित्ववच्च । अन्यथा खरविषाणादिवदवस्तुत्वमिति ॥२९०॥

रविराम्रियते कस्मा-ल्लोहकारत्वधीः कुतः ।

कस्माच्च कर्मबन्धः स्याद् वद विश्वत्रयेश्वर ! ॥

'घनयोगाद्' इति प्रत्युत्तरी(रि)तम् ॥

घन इति श्रुते मेघत्वाभ्युदयश्चेदयोघनादित्वविगमो घनत्वावस्थितिरित्यादि ॥२९१॥

आदिमध्यावसानस्थः पकारः स्वीयपर्ययैः ।

पवनं वपनं चैव वनपं व्यञ्जयत्यसौ ।

पवने यथा-पकारस्यातस्त्वाद् वपनस्योद्गमः । पवनस्य विपर्ययः साधारणवर्णसमूहस्याऽवस्थानमित्यादि ॥२९२॥

द्रव्यतः क्षेत्रतः कालाद् भावतः स्वपराश्रयात् ।

मिथोऽमी प्रतिपद्यन्ते हेतुमद्धेतुरूपताम् ।

नहि कश्चिद्धेतुरेव हेतुमानेवेत्यादितया सुवचः ॥२९३॥

आग्ग(अगा)दावबलादौ चा-नुत्तरादौ प्रवर्तते ।

अभावो देशभावश्च सर्वभावो नकारतः ॥

न गच्छतीत्यगः । अल्पं बलं यस्याः साऽबला । नास्त्युत्तरमस्मात्परमित्यनुत्तरं सर्वोत्तरमनुत्तममिति यावत् ॥२९४॥

कुमारशब्दः प्राच्याना-माश्विनं मासमूचिवान् ।

कीर्त्यते द(दा)क्षिण(णा)त्यानां चौरस्त्वोदनवाचकः ॥

न चैतन्निन्द्यम् , "वर्त्तका शकुनौ प्राचा-मुदीचां हन्त वर्त्तिका" इत्यादिप्रामाण्यात् ॥२९५॥

'षड्गुरु' रिति शब्दः शत-मशीतिमाख्यत् पुरोपवासानाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपवासत्रयमेव तु संप्रति आ(त्या)ज्ञाप [य] त्येषः ॥
दुःषमायां संयमस्य दुःपाल्यत्वादिति ॥२९६॥
घृतवाची भिषक्तन्त्रे बोधितो 'मिथुन' ध्वनिः ॥२९७॥
श्रूयन्ते च परावर्त्ताः समस्यायामनेकधा ॥
रुचिवैचित्र्यादनुभूयते ककारादौ खकारादीनामन्यतमत्वं तैस्तैरिति ॥२९८॥
सर्वासंख्यसमुद्राणां यावन्तो जलबिन्दवः ।
तदनन्तगुणार्थं स्या-न्नूनमेकैकमक्षरम् ॥
वस्तूनामानन्त्या माने(दे)वम् ॥२९९॥
स्यात्पदस्यैकदेशेऽपि समुदायोपकारिता ।
नैकान्तभिन्नादेशा हि वपुषांश्च(चू)लिकेव यत् ॥
केली-कुशल-कल्याण-कलादिः कादिमान् गणः ।
विश्ववर्ती समस्तोऽपि समस्यस्त्वेकशेषतः ॥
ततः सांकेतितत्वं स्याद् विभक्तिविनिवारकम् ।
इत्यर्थानयनोद्योगः सर्वत्रापि विधीयताम् ॥
अनेकान्तताादूतति(दूती)संकेतः ॥३००॥
चत्वारोऽक्षरनिक्षेपाः प्रोदिताः पूर्वपाठिभिः ।
नामतः स्थापनातश्च द्रव्यतो भावतस्तथा ॥
एतैः सर्वस्यापि व्याप्तत्वात् ॥३०१॥
द्रव्यार्थतस्त्रयो बोध्या-स्तुरीयः पर्ययार्थतः ॥३०२॥
द्रव्ये पर्ययगौणत्वं पर्यये द्रव्यगौणता ॥३०३॥
विगौणं नैव मुख्यं स्या-न्न गौणं मुख्यवर्जितम् ।
उपचारानुगत्यैव गौणान्मुख्येऽतिरिक्तता ॥३०४॥
अकारोऽयमिकारादेः सर्वथैवाऽऽदिमान् यदि ।
स जातो जायमानो वाऽगातां नामनि नाऽथवा ॥
इष्टः प्रथमपक्षश्चेत् सामान्याद्वा विशेषतः ।
नैकवर्त्ति तु सामान्यं विशेषे वैरमन्यतः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीयो यदि वाच्यत्व-हानेर्गगनपुष्पता ।
तस्मादक्षर इत्याख्या नामाक्षरतयाऽऽदितः ॥३०५॥
असद्भूतं च सद्भूत-मिति तु स्थापनाक्षरम् ॥३०६॥
यत्तदाकारवत् पूर्वं ;
अतः समस्या न वित्राणा ॥३०७॥
द्वितीयं लिपयः समाः ॥३०८॥
मानसं वाचिकं चेति द्रव्याक्षरमपि द्विधा ॥३०९॥
चिन्तिते मानसत्वं स्यात् ; ॥३१०॥
वाचिकत्वं तु भाषिते ॥३११॥
भावाक्षरं द्विधा देश-सर्वावरणहानितः ॥३१२॥
द्रव्याक्षरजमाद्यं स्यात् ;
पराधारेणाऽऽत्मनिष्ठम् ॥३१३॥
परं तु प्रतिबिम्बवत् ॥
केवलज्ञानिनि परिणतम् ॥३१४॥
साक्षरत्वं निगोदानां जीवत्वादुपयोगतः ।
यदेषु भावचेतो हि नातीव प्रतिषिध्यते ॥३१५॥
सनिगोदीयजीवस्य जिनविज्ञातमर्मणः ।
अक्षरानन्तभागस्तु सर्वदैवाऽवतिष्ठति(ते) ॥
मूल्यत्वेऽनन्तजीवौघ-मूलकस्य कपर्दिका ।
तदेकजीवस्तन्मूल्या-ऽनन्तभागं यथाऽर्हति ॥३१६॥
सन्तोऽक्षरतया प्रायः खुंकाराद्यप्यनक्षरम् ।
संक्षिपन्त्यर्थयुक्तत्वाद् ज्ञानाज्ञानसमासवत् ॥३१७॥
ज्ञानं केवलिनो ब्रूयाः सविकल्पमुताऽन्यथा ।
आदित्वेऽवतरन्त्येता भवामि-प्रमुखाः क्रियाः ॥
अन्यत्वे दर्शनत्वं स्यात् कपिलश्चातिपूजितः ।
प्रमाणहानेरापत्ति-स्ततः शशविषाणता ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्त्वस्मरणसानन्दै - गुरूपास्तिप्रसादतः ।
निरक्षरत्ववादाय देयो हन्त जलाञ्जलिः ॥३१८॥
निगोदाद्यजपर्यन्त - जन्तुभ्यो जगतोऽपि वा ।
न पनीपत्यते यस्मात् तस्मादक्षरमक्षरम् ॥
न पनीपत्यते - नाऽत्यन्तं पततीत्यर्थः ॥
अत एव कथंचिद् भेदः कथंचिदभेद इति सार्वत्रिकम् ॥३१९॥
यदृच्छा-वर्णसंयोग-कात्स्न्यामृतमहोदधिः ।
नैगमादिनयोर्म्यात्मा चिरं जीयाज्जिनागमः ॥
स्वरादयोऽकारादयश्चोभये वर्णा इति **नैगमः** ।१॥
स्वरादय एवेति **संग्रहः** ।२॥
अकारादय एवेति **व्यवहारः** ।३॥
तात्कालिका एवेति **ऋजुसूत्रः** ।४॥
वर्णः अक्षरमित्येवं ध्वनय एवेति **शब्दः** ।५॥
भिन्नो वर्णो भिन्नमक्षरमिति **समभिरूढः** ।६॥
वर्ण्यमान एव वर्ण इत्येव**मेवंभूतः** ।७॥
अस्यातोऽमी अन्तर्गडवः ॥३२०॥

इति शुश्रूषिता किञ्चिद् यथावद्वर्णमातृका ।
हेयोपादेयविज्ञेय-रहस्याभ्याससिद्धये ॥
अन्यत्र केवलि-पूर्विभ्यः प्राग्भारस्य दुस्तरत्वात् । नयानपद्रोहो यथावत्त्वम् ।१॥

अथवा साध्विदमुच्यते —
तीर्थे ज्ञातसुतस्य सर्वजनतानन्दैकहेतोरियं
या शाखाऽप्रथि **पार्श्वचन्द्र**जनिता तत्राऽभवन् **पाठकाः** ।
ये **रामेन्दु**पदा जिनेन्द्रपदवीपाथेयभाजोगत -
च्छिष्यस्या**ऽक्षयचन्द्रवाचक**मणेः पादप्रसादोऽवतात् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदेवं —

ॐ नमः श्री मच्चरमपरमेश्वरतीर्थसमर्थितपरमार्थपणकोटिमत्**कौटिकगणा**-ऽतन्द्र**चान्द्रकुल**विपुल**बृहत्तपो**बिरुदपूरितपरभाग**नागपुरीया**वदातविदित मुत्पीव**पार्श्वचन्द्रशाखा**सुखाकृत-सुकृतिवर**रामेन्दूपाध्याय**पदारविन्द मकरन्दमधुकरवाचकपदवीपवित्रि**ताक्षयचन्द्र**चरणेभ्यः ॥३२२॥

किं च —

संसारार्णवमग्नमादृशजनप्रोद्धाररज्जूपमाः

प्रेष्ठाचारविचारविश्रुत**यशश्चन्द्रो**दयस्फूर्तयः ।

ये ते विभ्रमभीतिभञ्जनभुजावीर्यप्रवीरा वरं

देयासुर्**गणिरक्त( त्न ? )चन्द्र**गुरवः कारुण्यलीलायितैः ॥

जगद्देशादेरपि कथंचिज्जगत्त्वम्। अन्यथा तीर्थकरादीनामापि जगदीश्वरत्वा-नुपपत्तेः ॥३२३॥

नन्दन्तु निर्वैरस्वभावा महामुनयः । तथाविधानां नामनिर्देशस्याऽप्युत्त-मत्वात् । इदमपेक्ष्यैवेदम् —

कृपापीयूषापात्राणां निश्शेषसुखशाखिनाम् ।

विद्याचरणचारूणां दासोऽस्मि महतामहम् ॥३२४॥

**परिसमाप्तं मातृकाप्रकरणं तदिति** ॥श्री॥

आसीदत्र महामुनिश्च **विजयानन्दाख्यसूरीश्वरः**

**श्रीलक्ष्मीविजया**ह्वयश्च सुगुणस्तस्याऽजनि शिष्यकः ।

तच्छिष्यस्य मुनीश**हंसविजय**स्यात्रोपदेशेन च

ग्रन्थोऽयं लिखितो बभूव भविनां मोक्षाख्यशर्मौघदः ॥१॥

लिषीतं कला गोपीनाथः ॥ श्रीरीनाथ मुकाम नागोर ॥ समत १९६६ रा मीती फागुण बद १४ लिखी छै। मुकाम भडोदामध्ये। मुनी माराज संपतविजेजी

ग्रंथा ग्रंथ ५५० ॥

★

Jain Education International For Private & Personal Use Only www.jainelibrary.org